In Public domain. Digitization Muthulakshmi Research Academy

संस्कृतपरिषत् ग्रन्थमाला - ५७

श्रीरामकर्णामृतम्

(श्रीरामचन्द्रस्तोत्राणां सङ्कलनम्)

प्रधान सम्पादिका
आचार्य.के. कमला

सम्पादकः
डा. वी. श्रीनिवासशर्मा

संस्कृतपरिषत्
उस्मानियाविश्वविद्यालयः हैदराबाद् - ५०० ००७

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

सीतालक्ष्मणसमेतश्रीरामचन्द्रप्रभुः

भद्राचलम्, आन्ध्रप्रदेशः



वामाङ्कस्थितजानकी परिलसत्कोदण्डदण्डं करे
चक्रंचोर्ध्वकरेण बाहुयुगले शङ्खं शरं दक्षिणे ।
बिभ्राणं जलजातपत्रनयनं भद्राद्रिमूर्ध्नि स्थितं
केयूरादिविभूषितं रघुपतिं सौमित्रियुक्तं भजे ॥

In Public domain. Digitization Muthulakshmi Research Academy

ग्रन्थोऽयं राष्ट्रियसंस्कृतसंस्थानस्य द्रव्यानुदानेन प्रकाशितः।

सर्वेऽधिकाराः स्वायत्तीकृताः

प्रथमावृत्तिः २००५

मूल्यम् - ४०.००

प्रकाशितम्

संस्कृतपरिषत्

उस्मानियाविश्वविद्यालयः

हैदराबाद् - ५०० ००७.

दूरवाणी - ०४० -२७०७०२८१

मुद्रणालयः

आर्. के. मुद्रणालये मुद्रितः

हैदराबाद् - ५०० ००१.

Phone.: 040-23214133, Cel.: 9391115308

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series - 57

SRIRAMAKARNAMRITAM

(An Anthology of verses dedicated to Sri Rama)

Chief Editor
Prof. K.KAMALA

Editor
Dr. V. SRINIVASA SARMA

SANSKRIT ACADEMY
Osmania University, Hyderabad - 500 007.

2005

In Public domain. Digitization Muthulakshmi Research Academy

(This Publication has been brought out with the financial assistance of Rastriya Sanskrit Sansthan, Ministry of H.R.D. Govt. of India. New Delhi.)

All Rights Reserved

First Edition 2005.

Price Rs. 40.00

Published by

SANSKRIT ACADEMY

Osmania University,

Hyderabad - 500 007.

Ph: 040 - 27070281

Printed by

R.K.Printers

Hyderabad - 500 001.

In Public domain. Digitization Muthulakshmi Research Academy

ACKONWLEDGMENT

I thank Prof. Vempati Kutumba Sastry Garu, Vice-Chancellor, and Staff Rashtriya Sanskrit Sansthan, Ministry of H.R.D. Govt of India for extending financial support to Sanskrit Academy and helping us in publishing books and various other activities.

I thank Prof. Suleman Siddiqui, Chairman, Managing Committee, Sanskrit Academy and Vice-Chancellor, Osmania University for extending the necessary financial, and administrative support to Sanskrit Academy.

Sanskrit Academy was supported by Osmania University for the past fifty years in various administrative matters.

I thank Prof. M. Mutha Reddy Garu, Registrar, Osmania University and a member, Managing Committee, Sanskrit Academy, as well as Sri K. Aravinda Rao Garu, D.I.G. Govt of Andhra Pradesh and Prof. B. Narasimhachayulu members of Managing Committee for extending all co-operation.

I thank Sri Praturi Sitaramanjaneyulu Garu, an octogenarian scholar for writing an introduction to the present text.

In Public domain. Digitization Muthulakshmi Research Academy

I thank Dr. V. Srivinivasa Sarma, Editor, Sanskrit Academy, and Sri K. V. Surya Prakash, Research Assistant, Sanskrit Academy, for helping me in brining out the present publication. Dr. V. Srinivasa Sarma, transcribed the text of Ramakarmamritam from a telugu text into nagari script.

I thank all those who are directly as well as indirectly helpful in presenting this text to the lovers of Sanskrit.

(K. KAMALA)
DIRECTOR

In Public domain. Digitization Muthulakshmi Research Academy

किञ्चिद् वचनम् ।

आश्वासचतुष्टयशरीरस्य श्रीरामचन्द्रपरमात्ममहिम-वर्णनस्तुतिपरस्य अस्य श्लोकसमुच्चयस्य व्यवहारपरम्पराप्रसिद्धं नाम '**श्रीरामकर्णामृतम्**'इति । एतदुपबृंहकत्वेन चतुर्थाश्वासान्ते दशोत्तरशततमे श्लोके '**श्रुत्यमृतं**' इति शब्दः दृश्यते च। नाम अस्य एतत् समीचीनं च यतः अयं खलु श्लोकसमुच्चयः आत्माश्रयैः माधुर्यपावित्र्यादिभिः उदात्ततरैः गुणैः भगवतः श्रीरामस्य कर्णयोः अमृतम्। अत एव पठितॄणां श्रोतॄणां भावुकानां मन्दमध्यमोत्तमाधिकारवतां उपासकानां सर्वेषां अपि झडिति श्रीरामानुग्रहसम्पादकश्च।

एवमेव अयं श्रीरामविषयकं पठितृ-श्रोतृ-भावुकोपा-सकादीनां सर्वेषां अपि कर्णयोः अमृतं च वर्तते।

इत्थं उभयथाऽपि नामैतदस्य अर्थवदेव। अत्र प्रथमे आश्वासे पञ्चोत्तरं शतं द्वितीये पञ्चदशोत्तरशतं तृतीये एकोनविंशत्यधिकं शतं चतुर्थे तु आश्वासे सैकादशं शतं च श्लोकाः इति आहत्य पञ्चाशदुत्तरचतुश्शतं श्लोकाः दृश्यन्ते।

राशब्दोच्चारमात्रेण मुखान्निर्यान्ति पातकाः।
पुनः प्रवेशभीत्या च मकारस्तु कवाटवत्।।(१ आ.१०४)

इत्ययं श्लोकः रामदासेन आन्ध्रभाषायां कृतस्य दशरथिशतकस्य

'रा कलुषंबुलेल्ल बयलं बडद्रोचिन' इत्यादिपद्यं स्मारयति।

इत्थं आलोचनसरणिमनुसृत्य श्रीरामकर्णामृते श्लोकरत्नानि स्वप्रकाशेन भावुकहृदयगुहाः नैरन्तर्येण सम्यक् दीपयन्त्येव। एतादृशस्य अस्य श्रीरामकर्णामृतस्य प्रकाशनं न केवलं आन्ध्राणां अपि तु सर्वेषां भारतदेशवासिनां भारतीयसंस्कृतौ श्रीरामचन्द्रभगवति च आसक्तचित्तानां अन्यदेशवासिनां च

In Public domain. Digitization Muthulakshmi Research Academy

उपकरोतु इति उदात्तेन उदारेण च संकल्पेन उस्मानियाविश्वविद्यालयानुबद्धया संस्कृतपरिषदा क्रियमाणं श्रीरामचन्द्रपरमात्मनोऽनुग्रहेण सर्वैः प्रकारैः सप्रयोजनं भूयात्।

एते च श्लोकाः एककर्त्तृकाः वा न वा इति निश्चेतुं न शक्यते। एवमेव अस्य श्लोकसमुच्चयस्य कविः कः? कौ? के इति वा अथवा संकलयिता कः इति वा निश्चेतुं न पार्यते।

अस्य श्रीरामकर्णामृतस्य एतत्स्वरूपसम्पादनसमय-विषयेऽपि एषा एव स्थितिः।

एतावत् तु निर्णेतुं शक्यते यत् लीलाशुककृतश्रीकृष्ण-कर्णामृतात् अनन्तरकालीनं इदं श्रीरामकर्णामृतम् इति।

किञ्च श्रीकृष्णकर्णामृतस्य कविः लीलाशुकः महान् वैयाकरणः न्यायमीमांसादिषु बहुषु शास्त्रेषु पारदृश्वा विद्वान् श्रीकृष्णविषये परमो भक्तश्च।

एवमेव प्रकृतस्य श्रीरामकर्णामृतस्य कविः न केवलं व्याकरणादिषु शास्त्रेषु अपि तु तंत्रयोगादिशास्त्रेष्वपि आगमे प्रयोगे च निष्णातः इति निर्णेतुं अस्मिन् ग्रन्थे प्रमाणानि लभ्यन्ते। यथा अस्य प्रबन्धस्य द्वितीये आश्वासे अष्टादशतमेन श्लोकेन, त्रिपञ्चाशत्तमं आरभ्य सप्तभिः एकाशीतितमं आरभ्य सप्तभिश्च श्लोकैः श्रीरामचन्द्रः मानवदेहान्तर्वर्तिसुषुम्ना-नाडीपथवर्तिकमलसप्तकवासितया वर्ण्यते स्तूयते च। अत्रादिसप्तकस्य भावमेवानन्तरसप्तकमनुवदति।

मूलादिषट्सरसिजांतसहस्रपद्म
पत्रान्तरालनिलयं भवबन्धनाशम्।
नादान्तचन्द्रगलितामृतसिक्तदेहं
नादान्तनादमहिमास्पदराममीले॥२-१८

तस्यास्य प्रकारः तच्छ्लोकान्तररूपेण अत्र प्रदर्श्यते।

In Public domain. Digitization Muthulakshmi Research Academy

अस्य श्लोकस्यायं भावः- मूलाधारादीनि यानि षट् सरसिजानि तेषां अन्ते सुषुम्नायाः नाड्याः ऊर्ध्वभागे यत् सहस्राराख्यं पद्मं ब्रह्मरन्ध्रान्तर्वर्ति तस्य पद्मस्य यानि पत्राणि सहस्रसंख्याकानि तेषां अन्तराले यत् स्थानं दहराकाशं तत् निलयः यस्य तादृशं भवेन निष्पन्नः ये जीवानां बन्धाः बहुविधाः ते नश्यन्ति यस्य प्रसादेन तादृशं नादान्ते सहस्रारे यः चन्द्रः तस्मात् गलितं साधकस्य कुण्डलिन्युत्थापनरूपेण साधनेन यत् अमृतं तेन अमृतेन सिक्तः यस्य देहः तादृशं नादान्तात् निष्पन्नो यः सूक्ष्मतमो नादः तस्य यो महिमा तस्य आस्पदं परमाश्रयस्थानभूतं च रामं ईले स्तौमि।। एवं च क्रमेण पद्मानां निरूपणमस्ति।

मूलाधारसरोरुहे हुतवहस्थाने त्रिकोणान्तरे
कन्दे कुण्डलिकासुषुप्तिपटले वासान्तवर्णाश्रये।
बालार्कप्रतिमं वराभयकरं पाशाङ्कुशालङ्कृतं
भूतस्वाश्रयमादिपूरुषमजं रामं भजे तारकम्।।२-५३

हुतवहस्थाने त्रिकोणस्य अन्तराले मूलाधाराख्ये सरोजे तस्य कन्दे कुण्डलिन्याः सुषुप्तिस्थाने व-श-ष-स एतेषां वर्णानां आश्रयभूते सदा वसन्तं बालः अर्कः प्रतिमा-उपमा यस्य तादृशं वरदानं अभयं च मुद्रारूपेण यस्य करयोः तादृशं अन्ययोः करयोः पाशाङ्कुशाभ्यां अलंकृतं भूतस्वाश्रयं आदिपूरुषं अजं तारकं प्रणवरूपं प्रणवस्य प्रतिपाद्यार्थभूतं सकलान् जीवान् अकारणेन कारुण्येन संसारसागरात् तारयन्तं रामं भजे।

स्वाधिष्ठानसरोरुहे प्रविलसद्बालान्तवर्णाश्रये
ब्रह्मग्रन्थिमहोन्नते करतले श्रीकुण्डिकामालिकाम्।
पीठे रत्ननिभे वराभयकरं वाणीयुतं बिभ्रतं
साक्षाद्बोधमनन्यमङ्गलकरं रामं भजे तारकम्।।२-५४

In Public domain. Digitization Muthulakshmi Research Academy

प्रकर्षेण विलसन्तः ये ब-भ-म-य-र-ल एते वर्णाः तेषां आश्रये ब्रह्मग्रन्थिना अत्यन्तं उन्नते-स्वाधिष्ठानाख्यं यत् सरोजं तस्मिन् रत्नैः रत्नवत् नितरां भासमानं यत् पीठं तस्मिन् विराजमानं करतले(षु) जलकुण्डिकां-अक्षमालिकां-वरमुद्रां अभयमुद्रां च दधन्तं वाण्या समेतं अनन्यं यत् मंगलं कैवल्यमुक्तिरूपं तत् कुर्वाणं स्वोपासकानां साक्षात् ज्ञानरूपं तारकं रामं भजे ।।

डाफान्ताक्षरपङ्कजे दशदले माणिक्यसम्पूरिते
विष्णुग्रन्थिमये वराभयकरं श्रीशङ्खचक्रान्वितम्।
मार्तण्डद्युतिमञ्जुलाभमतुलं पीताम्बरं कौस्तुभं
सर्वं सर्वगमिन्दिरासहचरं रामं भजे तारकम् ।।२-५५

अनन्तरं सुषुम्नानाडीपथे यत् दशदलं ड-ढ-ण-त-थ-द-ध-न-प-फ- एषां दशवर्णानां आश्रयभूतं माणिक्यैः सम्यक् पूरितं अत एव मणिपूरनाम्ना तंत्रे शास्त्रे व्यवह्रियमाणं विष्णुग्रन्थिमयं यत् सरसिजं तस्मिन् यत् जलजं-तस्मिन् प्रकाशमानं करचतुष्टये वराभयमुद्राभ्यां शंखचक्राभ्यां च सहितं मार्तण्डस्य या द्युतिः मञ्जुला तादृक् या आभा-तया युतं पीताम्बरेण कौस्तुभेन च रत्नेन अलंकृतं सर्वात्मानं सर्वत्र गच्छति व्याप्नोति इति तादृशं इन्दिरायाः लक्ष्म्याः सहचरं इन्दिरा स्वस्य सहचरी यस्य तादृशं च तारकं रामं भजे ।।

हृत्पद्मे विलयार्ककोटिसदृशं **काठान्तवर्णोज्ज्वले**
प्रणान्तप्रणवान्तरे प्रविलसद्दोर्बाणपीठान्तरे।
सूर्यं हंसमयं सदाशिवपदं कोदण्डदीक्षागुरुं
वासं मोक्षरमासमेतमनिशं रामं भजे तारकम् ।।२-५६

क-ख-ग-घ-ङ-च-छ-ज-झ-ञ-ट-ठ-एतैः द्वादशभिः वर्णैः अत्यन्तं प्रकाशमाने द्वादशदले सुषुम्नापथस्थे

In Public domain. Digitization Muthulakshmi Research Academy

अनाहतनाम्नि हृदयस्थानस्थिते भासमानं विलये ये कोटि-संख्याकाः सूर्याः तैः सदृशं प्राणस्य जगत्प्राणस्य वायोः यत् बीजं यकाररूपं तस्य षट्कोणरूपस्य अन्तः यः प्रणवः अथवा प्राणतत्त्वस्य अन्तः यः प्रणवः तस्य मध्ये प्रविलसत् यत् दोषि बाणरूपं पीठं तस्य पीठस्य मध्ये तिष्ठन्तं हंसमयं सूर्यं सदाशिवपदारूढं कोदण्डदीक्षागुरुं अनिशं मोक्षलक्ष्मीसमेतं तारकं रामं भजे ॥

साक्षात् षोडशदिव्यपत्रकमले जीवात्मसंस्थापिते
रुद्रग्रन्थिमये मनोन्मनिपथे जालन्ध्रपीठान्तरे।
शुभ्रज्योतिमयं शरीरसहितं सुस्थं सुधाशीतलं
शब्दब्रह्मनिवासभूतवदनं रामं भजे तारकम् ॥२-५७

अनन्तरं सुषुम्नानाडीपथे जीवात्मना सम्यक् स्थापिते रुद्रग्रन्थिमये षोडशसंख्याकैः दिव्यैः उत्तमैः पत्रैः युते विशुद्धाख्ये कण्ठस्थानस्थे अ-आ-इ-ई-उ-ऊ-ऋ-ॠ-लृ-लॄ-ए-ऐ-ओ-औ-अं-अः-एतैः षोडशभिः स्वरैः युतं मनोन्मनीमार्गे जालन्धरे पीठे शुभ्रज्योतिःस्वरूपं शरीरसहितं सुष्ठु स्थितं सुधावत्-अमृतवत्-शीतलं शब्दब्रह्मतत्त्वस्य निवासभूतं यत् वदनं तेन युतं तारकं रामं भजे ॥

भ्रूमध्ये निगमागमोज्ज्वलपदे चन्द्रे त्रिमार्गान्तरे
निर्द्वन्द्वे निखिलार्थतत्त्वविलसत्सूक्ष्मे सुषुम्नोन्मुखे।
आसीनं प्रलयार्कभासुरपरंज्योतिस्स्वरूपात्मकं
वर्णाभ्यञ्चितमोक्षलक्ष्मिसहितं रामं भजे तारकम् ॥२-५८

अनन्तरं भ्रुवोः मध्ये वर्तमानं निगमैः वेदैः आगमैश्च बहुप्रकारैः उज्ज्वलं यत् पदं स्थानं तस्मिन् चन्द्ररूपे त्रयाणां मार्गाणां अन्तराले निर्द्वन्द्वे द्वन्द्वरहिते निखिलैः अर्थानां तत्त्वैः विलसति सूक्ष्मे सुषुम्नायाः उन्मुखे ह-क्ष- एताभ्यां वर्णाभ्यां युते द्विदले आज्ञाख्ये

In Public domain. Digitization Muthulakshmi Research Academy

पद्मे आसीनं प्रलयसमये यः अर्कः ये वा अर्काः तद्वत् भासुरं परंज्योतिःस्वरूपं यत् आत्मतत्त्वं तदात्मकं मोक्षलक्ष्मीसहितं तारकं रामं भजे ॥

शीर्षाम्भोरुहकर्णिके निरुपमे श्रीषोडशारे शशि-
प्रख्यातामृतवार्धिवीचिलहरीनिर्वाणपीठान्तरे।
*शब्दब्रह्मपरं चराचरगुरुं तेजः परं शाश्वतम्
सत्यासत्यमगोचरं हृदि सदा सीतासमेतं भजे ॥२-५९

शिरोमध्यान्तर्वर्तिसहस्रारसरोजस्य मध्ये तत्कर्णिकायां श्रीमति षोडशभुजमंडले तत्रत्यस्य शशिनः प्रसरतः अमृतस्य यः उपासकश्रेष्ठप्रख्यातः वारिधिः तस्य याः वीचयः तासां अंशभूताः याः लहर्यः ताभिः सिद्धं यत् निर्वाणं तादृशनिर्वाणरूपस्य पीठस्य अन्तः प्रदेशे विराजमानं शब्दबह्माणं *परं शब्दबह्मतत्त्वार्थभूतं चराचरस्य जगतः गुरुं परं सर्वोत्कृष्टं तेजः शाश्वतं सत्यासत्यरूपं सीतासमेतं श्रीरामं मम हृदि सदा सेवे ॥

द्वितीयाश्वासस्थानां एकाशीतितमश्लोकप्रभृति सप्ता-शीतितमश्लोकपर्यन्तानां सप्तश्लोकानां अयं भावः-

वसान्ताक्षराख्ये चतुः पत्रपद्मे
त्रिकोणान्तकण्ठे धरातत्त्वयुक्ते।
वराभीतिपाशाङ्कुशं विद्रुमाभं
गजाश्वे निषण्णं भजे रामचन्द्रम् ॥२-८१

व-श-ष-स-एतैः वर्णैः युक्ते चतुर्दले धरातत्त्वयुक्ते पद्मे गजरूपे अश्वे-वाहने-निषण्णं-आसीनं-वराभय-पाशांकुशयुतं विद्रुमकान्तिसमानकान्त्या आसमानं श्रीरामचन्द्रं भजे ॥

---

*अस्मिन् श्लोके तृतीयचरणे शब्दब्रह्मपरं इत्यस्मिन् समासे पर शब्दस्य शब्दप्रतिपाद्यः इत्ययमर्थः समीचीनः।

In Public domain. Digitization Muthulakshmi Research Academy

बलान्ताक्षरप्रान्तषट्पत्रपद्मे
लसत्तोयतत्त्वे वराभीतिहस्तम्।
महाकुण्डिकां चाक्षमालां वहन्तं
चतुर्वक्त्ररूपं भजे रामचन्द्रम्।।२-८२

जलतत्त्वयुक्ते षट्दले ब-भ-म-य-र-ल-एतैः वर्णैः युक्ते स्वाधिष्ठानपद्मे समासीनं वराभयजलकुंडिकाऽक्षमालाधरं चतुर्वदनब्रह्मरूपं श्रीरामचन्द्रं भजे।।

डफक्षान्तराख्ये मणिव्रातपूरे
रथाङ्गाब्जहस्तं महेन्द्रोपलाङ्गम्।
लसद्वह्नितत्त्वे निषण्णं गदाङ्कं
महाविष्णुरूपं भजे रामचन्द्रम्।।२-८३

वह्नितत्त्वयुक्ते ड-ढ-ण-त-थ-द-ध-न-प-फ-एतैः वर्णैः युक्ते मणीनां समूहेन पूर्णे अत एव मणिपूर इति ख्याते दशदले सरोजे उपविशन्तं महेन्द्रनीलकान्तिसमकान्त्या विराजमानं शंखचक्रगदापद्मधरं महाविष्णुरूपं श्रीरामचन्द्रं उपासे।।

कठान्ताक्षराख्ये जगत्प्राणतत्त्वे
वराभीतिहस्तं त्रिशूलं दधानम्।
उमानाथमब्जारिखण्डोज्ज्वलाङ्कं
सदर्पाङ्गरूपं भजे रामचन्द्रम्।।२-८४

वायुतत्त्वयुक्ते हृदयस्थानस्थिते क-ख-ग-घ-ङ-च-छ-ज-झ-ञ-ट-ठ-एतैः द्वादशभिः वर्णैः युते द्वादशदले अनाहताख्ये सरोजे विराजमानं वराभयत्रिशूलधारिणं उमासमेतं चन्द्रखंडालंकृतोत्तमांगं दर्पयुतशरीरं शिवरूपं श्रीरामचन्द्रं भजे।।

विशुद्धाख्यपद्मे नभस्तत्त्वरम्ये
अरूपं सुरूपं समस्तस्वरूपम्।

In Public domain. Digitization Muthulakshmi Research Academy

विशिष्टं मनोऽगम्यमेकं अनादिं
भजे जीवजीवात्मरामं च रामम् ॥२-८५

आकाशतत्त्वेन युक्तं सत् रम्यं अ-आ-इ-ई-उ-ऊ-ऋ-ॠ-लु-लू-ए-ऐ-ओ-औ-अं-अः-एतैर्वर्णैः युक्तं षोडशदलं कण्ठकूपस्थानस्थितं यत् विशुद्धाख्यं सरोजं तस्मिन् उपविष्टं अरूपं सुरूपं समस्तस्वरूपं विशिष्टं मनसोऽप्यगम्यं एकं अनादिं जीवजीवे प्रत्येकस्मिन् जीवे (आ) रामं आरममाणं च रामं भजे ॥

द्विपत्राब्जमध्ये मनस्तत्त्वगम्ये
जगत्कारणं ज्योतिरानन्दरूपम् ।
लसद्भावविष्णुं मनोभावदीपं
परात्मस्वरूपं भजे रामचन्द्रम् ॥२-८६

मनस्तत्त्वेन युक्तं यत् रम्यं ह-क्ष-एताभ्यां वर्णाभ्यां युक्तं भ्रूमध्यस्थितं द्विदलं यत् आज्ञाख्यं पद्मं तस्य मध्ये राजन्तं जगत्कारणं ज्योतीरूपं आनन्दरूपं लसन् उपासकानां हृदयेषु प्रकाशमानः केवलं भावरूपः देशकालाबाध्यसत्तारूपः यो विष्णुः तेन अभिन्नं मनोवर्तिनः भावस्य दीपं दीपवत्प्रकाशकं परात्मस्वरूपं श्रीरामचन्द्रं भजे ॥

सदानन्ददेवे सहस्रारपद्मे गलच्चन्द्रपीयूषधाराप्लुतान्ते ।
स्थितं राममूर्तिं निषेवे निषेवे न सेवेऽन्यदैवं न सेवे न सेवे ॥२-८७

सदानन्ददेवे सद्रूपतया आनन्दरूपतया च दीव्यति प्रकाशमाने गलता सहस्रारपद्मान्तरालवर्तिनः चन्द्रस्य सम्बन्धि यत् पीयूषं तस्य धारया आप्लुतः अन्तः आन्तरप्रदेशः यस्य तादृशे सहस्रारपद्मे स्थितं राममूर्तिं पुनः पुनः सर्वदा निषेवे नितरां सेवे अन्यदैवं न सेवे ॥ न सेवे इत्यस्य त्रिरावृत्तिः अवधारणार्था ॥ नैव सेवे इत्यर्थः ॥

In Public domain. Digitization Muthulakshmi Research Academy

एतेषु श्लोकेषु अन्यत्र च तत्र तत्र एतत् स्तवकर्तुः तंत्रशास्त्रतत्त्वज्ञता सम्यक् दृश्यते।

अस्मिन् स्तवे तत्र तत्र कुलशेखरवर्मकृतमुकुन्द-मालास्तवस्थश्लोकानां अन्येषां च एतत् प्राचीनतराणां च भगवत् भगवतीस्तवपराणां श्लोकानां च अनुकृतिः दृश्यते।

अत्र उदाहरणानि :-

हे गोपालक हे दयाजलनिधे हे सद्गुणाम्भोनिधे
हे दैत्यान्तक हे विभीषणदयापारीण हे भूपते ।
हे वैदेहसुतामनोब्जविहृते हे कोटिमाराकृते
हे नव्याम्बुजनेत्र पालय परं जानामि न त्वां विना ॥
(४.३२)

जयतु जयतु रामो जानकीवल्लभोऽयं
जयतु जयतु रामश्चन्द्रचूडार्चिताङ्घ्रिः।
जयतु जयतु वाणीनाथनाथः परात्मा
जयतु जयतु रामोऽनाथनाथः कृपालुः ॥(४.४९)

मुकुन्दमालायां यथा -

हे गोपालक हे कृपाजलनिधे हे सिन्धुकन्यापते
हे कंसान्तक हे गजेन्द्रकरुणापारीण हे माधव।
हे रामानुज हे जगत्त्रयगुरो हे पुण्डरीकाक्ष मां
हे गोपीजननाथ पालय परं जानामि न त्वां विना॥ ४४॥

जयतु जयतु देवो देवकीनन्दनोऽयं
जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः।
जयतु जयतु मेघश्यामलः कोमलाङ्गो
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः॥२॥

चतुर्थे आश्वासे

प्रातः स्मरामि रघुनाथमुखारविन्दं
In Public domain. Digitization Muthulakshmi Research Academy
मन्दस्मितं मधुरभाषिविशालफालम्।
कर्णावलम्बिचलकुण्डलगण्डभागं
कर्णान्तदीर्घनयनं नयनाभिरामम्।।६८।।

प्रातर्भजामि रघुनाथकरारविन्दं
रक्षोगणाय भयदं वरदं निजेभ्यः।
यद्राजसंसदि विभिद्य महेशचापं
सीताकरग्रहणमङ्गलमाप सद्यः।।६९।।

प्रातर्नमामि रघुनाथपदारविन्दं
पद्माङ्कुशादिशुभरेखशुभावहं च।
योगीन्द्रमानसमधुव्रतसेव्यमानं
शापापहं सपदि गौतमधर्मपत्न्याः।।७०।।

प्रातर्वदामि वचसा रघुनाथ नाम
वाग्दोषहारि सकलं कलुषं निहन्तृ।
यत्पार्वती स्वपतिना सह भोक्तुकामा
प्रीत्या सहस्रहरिनामसमं जजाप।।७१।।

प्रातश्श्रये श्रुतिनुतां रघुनाथमूर्तिं
नीलाम्बुदोत्पलसितेतररत्ननीलाम्।
आमुक्तमौक्तिकविशेषविभूषणाढ्यां
ध्येयां समस्तमुनिभिर्निजभृत्यमुख्यैः।।७२।।

यश्श्लोकपञ्चकमिदं नियतः पठेत
नित्यं प्रभातसमये पुरुषः प्रबुद्धः।
श्रीरामकिङ्करजनेषु स एव मुख्यो
भूत्वा प्रयाति हरिलोकमनन्यलभ्यम्।।७३।।

In Public domain. Digitization Muthulakshmi Research Academy

एते श्लोकाः श्रीललितापञ्चरत्नश्लोकानां गणेशपञ्चरत्नानां च अनुकृतिरूपाः।

श्रीरामकर्णामृते बहवः गुणाः सहृदयहृदयावर्जकाः भक्तोपासकानां श्रीरामप्रसादप्रदाः पंडितजनमनसमाह्लादनाश्च श्लोका बहवो वर्तन्ते।

अत्र तारकत्वेन वीररामत्वेन सीतासमेततया इत्यादिविधया विशिष्टया श्रीरामप्रभुः उदात्तया शैल्या वर्ण्यते स्तूयते च।

बहुषु श्लोकेषु श्रुतितो गृहीताः 'आदित्यवर्णं तमसः परस्तात्' इत्यादिमंत्रपादाः दृश्यते, यथा -

परं पवित्रं परवासुदेवं
परात्परं तं परमेश्वराख्यम्।
गुणत्रयाराधितमूलकन्द-
मादित्यवर्णं तमसः परस्तात् ॥(२.९६)

'साक्षि' इत्यादयः आर्षप्रयोगाः अपि कृताः यथा -

मनस्स्थं मनोऽन्तस्थमाद्यन्तरूपं
महाचिन्त्यवर्ज्यं च मध्यस्थमीशम्।
मनोबुद्ध्यहङ्कारचित्तादिसाक्षिं
परस्वप्रकाशं भजे रामचन्द्रम्॥२.९४॥

परानन्दवस्तुस्वरूपादिसाक्षिं
परब्रह्मगम्यं परंज्योतिमूर्तिम्।
पराशक्तिमित्रप्रियाराधितांघ्रिं
परंधामरूपं भजे रामचन्द्रम् ॥(२.९५)

इमे प्रयोगाः स्तवस्यास्य पावित्र्यं वर्धयन्ति।

विजया दशमी — विनीतेन
१२-१०-२००५ — आत्रेयेण पातूरि सीतारामांजनेयेन

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

रामकर्णामृतम्

Sanskrit Academy, Hyderabad has great pleasure in presenting the text of Ramakarnamritam popularly claimed as a work of Adi Shankaracharya. It is heartening that Sanskrit Academy is publishing this text during its Golden Jubilee year. The present publication is based on a text published in telugu script with a telugu translation in poetry by Sri Chekuri Siddhakavi followed by a telugu prose translation by Sri Puranam Suryanarayana Tirtha, Published by Sri Rama Book Depot, Eluru, in the year 1948.

It is.evident from the tittle of the text that it is an imitation of Sri Krishna Karnamritam.

Krishnakarnamritam shows the poetic ecstasy in describing Balakrishna, Rasalila etc. Which inspired the great hindi poet Surdas. Ramakarnamritam cannot claim such an exalted position. It is a collection of poems written by different poets in different places and times and can be described as an anthology of poems. All these were south Indian poets. Their idioms, expressions, references to place-names and their naming Rama as Sabhanayaka and Seshachalarama (Seshachala-Tirupati) clearly show that it is a contribution made by south Indian devotees.

Sri krishnakarnamrita and Mukunda Mala

In Public domain. Digitization Muthulakshmi Research Academy
which are noted for poetic excstacy are not known to north Indians. I was surprised to note that even a scholar from Madhya Pradesh was not aware of such a poem. When verses like - करारविन्देन पदारविन्दं, कस्तूरीतिलकं ललाटफलके etc अङ्गनामङ्गनामन्तरा माधवः etc, were quoted, they were pleasantly surprised. It cannot be expected that Ramakarnamrita is known beyond Vindhya mountaion ranges. I quote a well-known sloka from this text which is recited in all marriages of telugu families. It is -

जानक्याः कमलामलाञ्जलिपुटे याः पद्मरागायिताः
न्यस्ता राघवमस्तके च विलसत् कुन्दप्रसूनायिताः।
स्रस्ताः श्यामलकायकान्तिकलिता या इन्द्रनीलायिताः
मुक्तास्ताः शुभदा भवन्तु सततं श्रीरामवैवाहिकाः ।। Ram.I-84.

In Bhadrachalam on the banks of river Godavari, the famous Sri Rama temple is built and rennovated by his devotee Gopanna Ramadas, who was imprisoned by king Tana Shah of Golconda for using the Government money for building this temple without taking prior permission. The story runs that Sri Rama and Lakshmana interfered paid the dues to the king and got Ramadas released. This is a hitorical incident. The devotional songs of Ramadas are house-hold songs in Andhra Pradesh. They are sung even by illiterate people. The songs of Ramadas paved way to carnatak classical musical tradition which

In Public domain. Digitization Muthulakshmi Research Academy

was continued by Tyagaraja, another devotee of Sri Rama. Telugu language which is musical dominates in carnatak musical tradition due to the songs of these great devotees. It is necessary to give this background in order to explain the above verse.

In telugu marriages alone the bride and the groom fill their Anjalis (both hands) with rice-grain and pour the grain on each other's head. This ceremony known as 'Talambralu' is unique to telugu marriages. The neighbouring Karnataka and Maharashtra regions also do not have this custom.

In telugu desa each village has a temple dedicated to Sri Rama. On Ramanavami day Sitaramakalyana is performed in all these temples headed by Bhadrachalam temple.

The history states that king Tanashah became Sri Rama's devotee and offered pearls to the deities at Bhadrachalam on every Ramanavami day to be offered as 'talambralu' on the occasion of Sitarama kalyanam. This great tradition creating hindu-mohammadan brotherhood continues till the present day. On every Ramanavami day the Nizam rulers, and subsequently government officials of Andhra Pradesh offer pearls to the God.

The above verse means:- When pearls

In Public domain. Digitization Muthulakshmi Research Academy

were held in sita's hands they looked like rubies due to the reflection of the pink colour of her palms. When they were poured on Sri Rama's head they shone as pure white kunda flowers. But the same pearls appeared like Indra-nila stones (Blue saphires) when they dropped on Sri Rama's dark body. Let such pearls mixed with rice-grain offered in his marriage bring prosperity to the people.

In ordinary weddings rice-grain in kilos and kilos are offered as ' Talambralu' Devotees collect few grains from Bhadrachalam and mix the same in the weddings of their kith and kin.

Ramakarnamritam is divided into four cantos called Aswasas. The poetry lacks uniformity. It is set in different metres written by many poets. But some verses continue the same makuta (title) showing that all such verses must have been composed by the same poet though the poet prefers to remain anonymous. Some of the outstanding makutas are

(1) रामं भजे तारकम् II - 14,15, 16, 30, 31, 32,33, 35, 36, 38, 39, 40,41,42, 47, 50, 51, 53, 54, 55, 56, 57, 58, 60, 61, 78, 97, 98, 99, 100, 101, 102, 103

(2) वन्दे सदा राघवम् II - 62, 63, 64, 65, 66, 67, 68, 69

(3) विजयराममीले हरिम् II - 71, IV -13

In Public domain. Digitization Muthulakshmi Research Academy

(4) सभानायकं - II - 68,
(5) समष्टिपुरवल्लभं - II - 73,
(6) शेषाचलरामः - II - 93,
(7) श्रीविद्यास्वरूपः रामः - II - 102,
(8) पातु मां रामरत्नम् - II - 105, 106, 107, 108, 109,
(9) पातु मांराममन्त्रम् - II - 110, 111, 112, 113, 114
(10) रामं भजे राघव रामचन्द्रम् - III - 58, 59, 60, 61, 62, 63, IV - 32, 99
(11) पातु मां वीररामः- III - 83, 84, 85, 86, 87
(12) सीतासमेतं भजे - I -45, III - 21,22, 24, 25, 26, 27, 29, 30, 31, 32, 33, 34, 35, 36, 37,38,39
(13) दिव्यारण्ययतीन्द्रनामनगरे - The reference is not understood, which नगर is referred III - 33
(14) रामं भजे श्यामलम् - I - 27, 28, 29
(15) कलयाणरामं भाजे - I - 47, IV - 56

The verses ending with ' रामं भजे तारकम् refer to Srividya, different chakras (plexus), lotuses and mystic association of different letters of sanskrit alphabet with different chakras are described here कठ is one such verbal combination.The twelve letters is this pocket are क, ख, ग, घ, ङ, च, छ, ज, झ, ञ, ट, and ठ the title कठोपनिषत् refers to this कठयोग according to Sadguru Sri. Sivanandamurthy Garu of Anandavanam, Bhimunipatnam in Andhra

In Public domain. Digitization Muthulakshmi Research Academy
Pradesh, his telugu book 'Kathayoga' interprets the text of kathopanishad in a yogic, way. This book is being translated into english by Sri. David Frawley, a famous indologist of international reputation its hindi translation by Prof. Manikyamba (Dept of Hindi, Osmania University) is also ready for publication.

I am thankful to the octogenarian Sanskrit scholar Sri. Praturi Subaramanjaneyulu for interpriting all these verses with the mukuta ' रामं भजे तारकम् according to the Tantra Sastra.

Many adhyana slokas of Ramayam are found here such as

(१)वालमीकिस्मृतिमन्दरेण...... श्रीरामायणदुग्धसिन्धुरमलो भूयात् सुखश्रेचसे॥ I - 72

(२) वामे भूमिसुता .... मध्ये नीलसरोजकोमलरुचिं रामं भजे श्यामलम्॥ I - 28

(३) वैदेहीसहितं .... व्याख्यानां भरतादिभिः परिवृतं रामं भजे श्यामलम्॥ I - 2

The verse ' वामाङ्कस्थित जानकी .... I - 27 describes Sri Rama of Bhadrachalam temple who holds sankha and an bana(arrow) on both his right hands chakra and dhanus(bow) on both his left hands. Sita is seated on his left thigh while Lakshmana stands aside. This is a figure of Chaturbhuja Rama. He is Vishnurupa.

Nine rasas are made (described) in the following verse.

शृङ्गारं क्षितिनन्दिनीविहरणे *वीरं* धनुर्भञ्जने

In Public domain, Digitization Muthulakshmi Research Academy

कारुण्यं बालिभाजने*ऽद्भुतरसं* सिन्धौ गिरिस्थापने।
हास्यं शूर्पणखामुखे *भयवहे बीभत्स*मन्यामुखे
रौद्रं रावणमर्दने मुनिजने *शान्तं* वपुः पातु नः ॥ 1 -39

This verse is a reflection of the following verse of Saundaryalahari of Sankara.

शिवे शृङ्गारार्द्रा तदितरजने कुत्सनपरा
सरोषा गङ्गायां गिरिशचरिते विस्मयवती।
हराहिभ्यो भीता सरसिरुह सौभाग्यजननी
सरवीषु स्मेरा ते मयि जननि दृष्टि सकरुणा॥ सौन्दर्य -५

The following verse is sung with great devotion by carnatic musicians.

शत्रुच्छेदैकमन्त्रं सरसमुपनिषद्वाक्यसम्पूज्यमन्त्रं
संसारोत्तारमन्त्रं समुचितसमये सङ्गनिर्याणमन्त्रम्।

A beautiful rupaka is found in चिन्तातूलिकया लिखन्ति सुधियश्चिन्तेषु पीताम्बरम् । - 48.

Rama is identified with Ranganatha Swamy of Srirangam in the verse (II - 2) of the text the following sloka. 'रामो नाम बभूव हुं' (III - 112) is repeated from श्रीकृष्णकर्णामृतं while.

निरामयं रामकथामृतं पिब (IV - 4) is a reflection of निरामयं कृष्णरसायनं पिब of mukundamala.

A sloka runs as follows,

इन्दीवरदलश्याममिन्दुकोटिनिभाननम्।
कन्दर्पकोटिलावण्यं वन्देऽहं रघुनन्दनम्॥ IV - 80

This is a reflection of the following verse;-

इन्दीवरदलश्याममिन्दिरानन्दकन्दलम्।
वन्दारुजनमन्दारं वन्देऽहं यदुनन्दनम्॥

The above verse is by mallinatha suri describing lord krishna in the introduction of

In Public domain. Digitization Muthulakshmi Research Academy

his famous Sarvamkasha commentary to sisupalavadhakavyam.

some verses of रामरक्षास्तोत्र have found place in this text.

But as a collection of devotional verses dedicated to Sri Rama by south Indian poets, Sri Ramakarnamritam enjoys popularity among devotees and critics which it richly deserves. It is a वक्रोक्तिमयकाव्य and these verses can be easily learnt by heart. It comes from Andhra Desa. Every poet of Andhra dreams of composing a verse or two on Sri Rama His Mangalacharana begins with Sri Rama.

It is hoped that this book will be welcomed by scholars of North Indian as well. They will taste South Indian Sanskrit idiom in this kavya.

Mattebha and Sardula are twin varittas popular in telugu poetry. म,स,ज,स, त,त,ग is the arragement of ganas in Sardula. This metre is popular among sanskrit poets. Mattebha has स,भ,र,न,म,य,व (ल + ग) which is seldom found used in Sanskrit. The following verse is notable.

सरयूतीरवने लतानिवसने सद्रत्नवेदीतटे
सुमपर्यङ्कतले विदेहसुतया सार्धं परिक्रीडतः।
कस्तूरीघनसार चन्दनमिलदगन्धोल्लसत् पावनी
पायान्मूर्तिरनामया रघुपतेर्भद्रालिका नोऽनिशम्॥ IV - 25

The first half of the above verse is a मत्तेभवृत्त and second half a शार्दूलवृत्त.

K.Kamala

In Public domain. Digitization Muthulakshmi Research Academy

श्रीमात्रे नमः

मङ्गलं भगवान् विष्णुर्मङ्गलं मधुसूदनः।
मङ्गलं पुण्डरीकाक्षो मङ्गलं गरुडध्वजः ॥१॥ अनुष्टुप्

मङ्गलं कोसलेन्द्राय महनीयगुणाब्धये।
चक्रवर्तितनूजाय सार्वभौमाय मङ्गलम् ॥२॥

वेदवेदान्तवेद्याय मेघश्यामलमूर्तये।
पुंसां मोहनरूपाय पुण्यश्लोकाय मङ्गलम् ॥३॥

विश्वामित्रान्तरङ्गाय मिथिलानगरीपतेः।
भाग्यानां परिपाकाय भव्यरूपाय मङ्गलम् ॥४॥

पितृभक्ताय सततं भ्रातृभिस्सह सीतया।
नन्दिताखिललोकाय रामचन्द्राय मङ्गलम् ॥५॥

त्यक्तसाकेतवासाय चित्रकूटविहारिणे।
सेव्याय सर्वयमिनां धीरोदात्ताय मङ्गलम् ॥६॥

सौमित्रिणा च जानक्या चापबाणासिधारिणे।
संसेव्याय सदा भक्त्या सानुजायाऽस्तु मङ्गलम् ॥७॥

दण्डकारण्यवासाय खण्डितामरशत्रवे।
गृध्रराजाय भक्ताय मुक्तिदायास्तु मङ्गलम् ॥८॥

सादरं शबरीदत्तफलमूलाभिलाषिणे।
सौलभ्यपरिपूर्णाय सत्त्वोद्रिक्ताय मङ्गलम् ॥९॥

हनुमत्समवेताय हरीशाभीष्टदायिने।
वालिप्रमथनायास्तु महाधीराय मङ्गलम् ॥१०॥

श्रीमते रघुवीराय सेतूल्लङ्घितसिन्धवे।
जितराक्षसराजाय रणधीराय मङ्गलम् ॥ ११॥

In Public domain. Digitization Muthulakshmi Research Academy

आसाद्य नगरीं दिव्यामभिषिक्ताय सीतया।
राजाधिराजराजाय रामभद्राय मङ्गलम्।।१२।।

विभीषणकृते प्रीत्या विश्वाभीष्टप्रदायिने।
जानकीप्राणनाथाय सदा रामाय मङ्गलम्।।१३।।

******

प्रथमाश्वासः

श्रीरामं त्रिजगद्गुरुं सुरवरं सीतामनोनायकं
श्यामाङ्गं शशिकोटिकान्तिवदनं चञ्चत्कलाकौस्तुभम्।
सौम्यं सत्त्वगुणोत्तरं च सरयूतीरे वसन्तं प्रभुं
त्रातारं सकलार्थसिद्धिसहितं वन्दे रघूणां पतिम्।।१।।

श्रीराघवं दशरथात्मजमप्रमेयं
सीतापतिं रघुकुलान्वयरत्नदीपम्।
आजानुबाहुमरविन्ददलायताक्षं
रामं निशाचरविनाशकरं नमामि।।२।।

श्रीरामं बलवैरिनीलचिकुरं स्मेराननं श्यामलं
कर्णान्तायतलोचनं सुरवरं कारुण्यपाथो निधिम्।
शोणाम्भोरुहपादपल्लवयुगं क्षोणीतनूजायुतं
राजत्कुण्डलगण्डभागयुगलं रामं सदाऽहं भजे।।३।।

श्रीरामं जगदेकवीरममलं सीतामनोरञ्जनं
कौसल्यावरनन्दनं रघुपतिं काकुत्स्थवंशोद्भवम्।
लोकानामभिराममङ्गलकरव्यापारपारायणं
वन्देऽहं जनघोरपापनिकरध्वंसं विभुं राघवम्।।४।।

In Public domain. Digitization Muthulakshmi Research Academy

रामकर्णामृतम्

श्रीरामं जगदीश्वरं जनकजाजानिं जनानन्दनं
जन्तूनां जनकं जनार्तिहरणं लोकेश्वरं शाश्वतम्।
जाबाल्यादिमुनीश्वरैः परिवृतं जाज्वल्यमानं सदा
जङ्गालं जमदग्निसूनुहरणं जातानुकम्पं भजे ।।५।।

श्रीरामो रघुनायको रघुवरो राजीवनेत्राञ्चितो
राजेन्द्रो रघुपुङ्गवो रघुकुलोत्तंसो रघूणां पतिः।
रामो राक्षसनाशकोऽमितबलो राकेन्दुबिम्बाननो
राजत्किङ्किणिकङ्कणाङ्कितकरो रामस्सदा पातु नः ।।६ ।।

श्रीरामचन्द्र करुणाकर राघवेन्द्र !
राजेन्द्रचन्द्र रघुवंशसमुद्रचन्द्र ! ।
सुग्रीवनेत्रयुगलोत्पलपूर्णचन्द्र !
सीतामनःकुमुदचन्द्र! नमो नमस्ते ।।७ ।।

श्रीरामं करुणाकरं गुणनिधिं सीतापतिं शाश्वतं
पारावारगभीरमब्जनयनं प्रावृड्घनश्यामलम्।
वीरश्रेष्ठमनामयं विजयिनं विश्वप्रकाशात्मकं
घोरारिप्रकराधिदप्रहरणं कोदण्डरामं भजे ।।८ ।।

श्रीरामचन्द्रेति सलक्ष्मणेति नीलोत्पलश्यामलकोमलेति।
आक्रोशयुक्ताऽस्त्वधुनैव जिह्वा सीतापते ! राघव ! राघवेति ।।९ ।।

श्रीरामचन्द्रे रमतां मनो मे रमाङ्गवामे विपदां विरामे।
जितारिरामे प्रणतारिरामे गुणाभिरामे भुवनैकरामे ।।१० ।।

श्रीरामचन्द्र ! रघुपुङ्गव ! राजवर्य!
राजेन्द्रराज ! सुरनायक ! राघवेश ! ।
राजाधिराज ! रघुनन्दन ! रामभद्र
दासोऽस्म्यहं च भवतश्शरणागतोऽस्मि ।।११ ।।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरामं सरसीरुहाक्षममलं दूर्वाङ्कुरश्यामलं
विद्युत्कोटिनिभप्रभाम्बरधरं वीरासनाधिष्ठितम्।
वामाङ्कोपरि संस्थितां जनकजामालिङ्ग्य तां बाहुना
तत्त्वं चापरपाणिना मुनिगणानाज्ञापयन्तं भजे ॥१२॥

श्रीरामस्सकलेश्वरो मम पिता माता च सीता मम
भ्राता ब्रह्मसखा प्रभञ्जनसुतः पत्नी विरक्तिप्रिया।
विश्वामित्रविभीषणादिवशिनो मित्राणि बोधस्सुतो
भक्तिश्श्रीहरिसङ्गता रतिसुखं वैकुण्ठमस्मत्पदम्॥१३॥

श्रीरामाऽमलपुण्डरीकनयन! श्रीराम! सीतापते!
गोविन्दाच्युत! नन्दनन्दन! मुकुन्दानन्द! दामोदर!।
विष्णो! राघव! वासुदेव! नृहरे! देवौघचूडामणे!
संसारार्णवकर्णधारकुहरे कृष्णाय तुभ्यं नमः॥१४॥

रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुन्दरं
काकुत्स्थं करुणाकरं गुणनिधिं विप्रप्रियं धार्मिकम्।
राजत्कुण्डलमण्डिताननरुचिं रात्रिञ्चरध्वंसिनं
शम्पाकोटिसमानकान्तिविलसन्मायामृगघ्नं भजे॥१५॥

रामं रत्नकिरीटकुण्डलधरं केयूरहारान्वितं
सीतालङ्कृतवामभागमतुलं सिंहासनस्थं प्रभुम्।
सुग्रीवादिसमस्तवानरवरैस्संसेव्यमानं सदा
विश्वामित्रपराशरादिमुनिभिस्संस्तूयमानं भजे॥ १६॥

रामस्सीतासमेतो निवसतु हृदये सानुजं राममीले
रामेण क्षीणपापस्त्रिविधमपि कृतं कर्म रामाय दद्याम्।
रामादन्यं न जाने न हि किमपि महारामनाम्नस्समानं
रामे पश्यामि विश्वं भुवनमनुदिनं पाहि मां रामचन्द्र!॥१७॥

In Public domain. Digitization Muthulakshmi Research Academy

रामं राजशिखामणिं रघुपतिं देवारिदर्पापहं
लोकानां हितकारिणं गुणनिधिं कारुण्यपुण्योदयम्।
मुक्ताविद्रुमरत्नशोभिततनुं सौन्दर्यहस्ताम्बुजं
कौसल्यातनयं भजामि सततं श्रीजानकीनायकम्॥१८॥

रामं वीरासनस्थं हृदयगतकरोदञ्चितज्ञानमुद्रं
जानुन्यासक्तहस्तं क्षितिवरतनयाभूषितं वामभागे।
षट्कोणे व्याहरन्तं पवनसुतयुतं मानसे मानयन्तं
सुग्रीवे सेवमाने धृतशरधनुषा दक्षिणे लक्ष्मणेन॥१९॥

रामं सौमित्रिमित्रं रघुपतिममलं रामचन्द्रं रमेशं
रम्यं श्रीराघवेशं शुभललितमुखं शुद्धसत्त्वं सुवीरम्।
सीतासौन्दर्यपात्रं सुरमुनिविनुतं नीरदेन्दीवराभं
वन्दे वन्दारुपालं रजनिचरहरं रम्यकोदण्डपाणिम्॥२०॥

रामं चन्दनशीतलं क्षितिसुताहृन्मोहकं श्रीकरं
वैदेहीनयनारविन्दमिहिरं सम्पूर्णचन्द्राननम्।
राजानं करुणासमेतनयनं सीतामनस्स्यन्दनं
सीतादर्पणचारुगण्डललितं वन्दे सदा राघवम्॥२१॥

रामं श्यामाभिरामं रविशशिनयनं कोटिसूर्यप्रकाशं
दिव्यं दिव्यास्त्रपाणिं शरमुखशरधिं चारुकोदण्डहस्तम्।
कालं कालाग्निरुद्रं रिपुकुलदहनं विघ्नविच्छेददक्षं
भीमं भीमाट्टहासं सकलभयहरं रामचन्द्रं भजेऽहम्॥२२॥

रामचन्द्रचरिताकथामृतं लक्ष्मणाग्रजगुणानुकीर्तनम्।
राघवेश ! तव पादसेवनं सम्भवन्तु मम जन्म जन्मनि॥२३॥

In Public domain. Digitization Muthulakshmi Research Academy

रामो मत्कुलदैवतं सकरुणं रामं भजे सादरं
रामेणाखिलघोरपापनिहती[१] रामाय तस्मै नमः।
रामान्नास्ति जगत्त्रयैक सुलभो रामस्य दासोऽस्म्यहं
रामे प्रीतिरतीव मे कुलगुरो! श्रीराम रक्षस्व माम्॥२४॥

श्रीरामचन्द्र तव कीर्तिसुरद्रुमस्य
तारागणस्सुमनसः फलमिन्दुबिम्बम्।
मूलं फणाफणिगतं गगनं च मध्यं
शाखादिशो भुवनमण्डलमालवालम्॥२५॥

वैदेहीं मुदितोऽभिजातपुलकां गाढं समालिङ्गयन्
वामेन स्तनचूचुकं पुलकितं वामं करेण स्पृशन्।
तत्त्वं दक्षिणपाणिना कलितया चिन्मुद्रया बोधयन्
रामो मारुतसेवितस्स्मरतु मां साम्राज्यसिंहासने॥२६॥

वामाङ्कस्थितजानकीं परिलसत्कोदण्डदण्डं करे
चक्रं चोर्ध्वकरेण बाहुयुगले शङ्खं शरं दक्षिणे।
बिभ्राणं जलजातपत्रनयनं भद्राद्रिमूर्ध्नि स्थितं
केयूरादिविभूषितं रघुपतिं रामं भजे श्यामलम्॥२७॥

वामे भूमिसुता पुरस्तु हनुमान्पश्चात्सुमित्रासुत-
श्शत्रुघ्नो भरतश्च पार्श्वदलयोर्व्यार्य्वादिकोणेष्वपि।
सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्
मध्ये नीलसरोजकोमलरुचिं रामं भजे श्यामलम्॥२८॥

वैदेहीसहितं सुरद्रुमतले हैमे महामण्टपे
मध्ये पुष्पकमासने मणिमये वीरासने सुस्थितम्।
अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं
व्याख्यान्तं भरतादिभिः परिवृतं रामं भजेश्यामलम्॥२९॥

[१] रामेणाभिहता निशाचरचमूः

In Public domain. Digitization Muthulakshmi Research Academy

वैदेहीं परिरभ्य जातपुलकां लज्जावतीं सुस्मितां
काञ्चीनूपुरहारकङ्कणलसत्कर्णावतंसोज्ज्वलाम्।
कस्तूरीघनसारचर्चितकुचां चन्द्राननां श्यामलं[1]
कन्दर्पाधिकसुन्दरं रघुपतिं श्रीरामचन्द्रं भजे॥३०॥

वैदेहीरमणं विभीषणविभुं विष्णुस्वरूपं हरिं
विश्वोत्पत्तिविपत्तिपोषणकरं विद्याधरैरर्चितम्।
वैरिध्वंसकरं विरिञ्चिजनकं विश्वात्मकं व्यापकं
व्यासाङ्गीरसनारदादिविनुतं वन्दामहे राघवम्॥३१॥

वैदेहस्य पुरे विवाहसमये कल्याणवेद्यन्तरे
सामोदे विमलेन्दुरत्नखचिते पीठे वसन्तौ शुभे।
शृण्वन्तौ निगमान्ततत्त्वविदुषामाशीर्गिरस्सादरं
पायास्तां सुवधूवरौ रघुपतिश्श्रीजानकी चानिशम्॥३२॥

असितकमलभासा भासयन्तं त्रिलोकीं
दशरथकुलदीपं दैवताम्भोजभानुम्।
दिनकरकुलबालं दिव्यकोदण्डपाणिं
कनकखचितरत्नालङ्कृतं राममीले॥३३॥

सुस्निग्धं नीलकेशं स्फुटमधुरमुखं सुन्दरभ्रूललाटं
दीर्घाक्षं चारुनासापुटममलमणिश्रेणिकादन्तपङ्क्तिम्।
बिम्बोष्ठं कम्बुकण्ठं कठिनतरमहोरस्कमाजानुबाहुं
मुष्टिग्राह्यावलग्नं पृथुजघनमुदारोरुजङ्घाङ्घ्रिमीले॥३४॥

वन्दामहे महेशानचण्डकोदण्डखण्डनम्।
जानकीहृदयानन्दचन्दनं रघुनन्दनम्॥३५॥

---

१. कस्तूरीघनसारचर्चितकुचां चन्द्राननां श्यामलः
कन्दर्पाधिकसुन्दरो विजयते श्रीरामचन्द्रः प्रभुः॥

In Public domain. Digitization Muthulakshmi Research Academy

जानाति राम! तव नाम रुचिं महेशो
जानाति गौतमसती चरणप्रभावम्।
जानाति दोर्बलपराक्रममीशचापो
जानात्यमोघपटुबाणगतिं पयोधिः ॥३६ ॥

दिव्यस्यन्दनमध्यगं रणरणच्चापान्वितं भीषणं
कालाग्निप्रतिमानबाणकलितं घोरास्त्रतूणीद्वयम्।
सुग्रीवाङ्गदरावणानुजमरुत्पुत्रादिसंसेवितं
रामं राक्षसवीरकोटिहरणं रक्ताम्बुजाक्षं भजे ॥३७ ॥

ब्रह्माद्यामरसिद्धजन्मभुवनं यन्नाभिपङ्केरुहं
श्रीनिर्वाणनिकेतनं यदुदरं लोकैकशय्यागृहम्।
यद्वक्षः कमलाविलासभवनं यन्नाममन्त्रं सतां
वासागारमखण्डमङ्गलनिधिः पायात्स नो राघवः ॥३८ ॥

शृङ्गारं क्षितिनन्दिनीविहरणे वीरं धनुर्भञ्जने
कारुण्यं बलिभोजनेऽद्भुतरसं सिन्धौ गिरिस्थापने।
हास्यं शूर्पणखामुखे भयवहे बीभत्समन्यामुखे
रौद्रं रावणमर्दने मुनिजने शान्तं वपुः पातु नः ॥३९ ॥

माता रामो मत्पिता रामचन्द्रो
भ्राता रामो मत्सखा राघवेशः।
सर्वस्वं मे रामचन्द्रो दयालु-
र्नान्यं दैवं नैव जाने न जाने ॥४० ॥

मूले कल्पद्रुमस्याखिलमणिविलसद्रत्नसिंहासनस्थं
कोदण्डेनाशुगेनोल्लसितकरयुगेनार्चितं लक्ष्मणेन।
वामाङ्कन्यस्तसीतं भरतधृतमहामौक्तिकच्छत्रकान्तं
शत्रुघ्ने चामराभ्यां सुविलसितकरे रामचन्द्रं भजेऽहम् ॥४१ ॥

In Public domain. Digitization Muthulakshmi Research Academy

वामे कोदण्डदण्डं निजकरकमले दक्षिणे बाणमेकं
पश्चाद्भागे च नित्यं दधतमभिमतं चापतूणीरभारम्।
वामेऽवामे लसद्भ्यां सहमिलिततनुं जानकीलक्ष्मणाभ्यां
रामं श्यामं भजेऽहं प्रणतजनमनः खेदविच्छेददक्षम्।। ४२ ।।

अम्भोधरश्यामलमम्बुजाक्षं
धनुर्धरं बद्धजटाकलापम्।
पार्श्वद्वये लक्ष्मणमैथिलीभ्यां
निषेव्यमाणं प्रणमामि रामम्।।४३ ।।

कोदण्डदीक्षागुरुमप्रमेयं सलक्ष्मणं दाशरथिं दयालुम्।
आजानुबाहुं जगदेकवीरमनाथनाथं रघुनाथमीडे।।४४ ।।

कर्पूराङ्गविलेपनं रघुवरं राजीवनेत्रं प्रभुं
कस्तूरीनिकराकृतिं खरधृतिप्रध्वंसिनं श्रीहरिम्।
कन्दर्पायुतकोटिसुन्दरतनुं कामारिसेव्यं गुरुं
कान्ताकामदमप्रमेयममलं सीतासमेतं भजे।।४५।।

नीलाब्दबृन्दसदृशं परिपूर्णदेहं
दिक्पालकादिसुरसेवितपादपद्मम्।
पीताम्बरं कनककुण्डलशोभिताङ्गं
सीतापतिं रघुपतिं सततं भजामि।।४६।।

भर्गब्रह्मसुरेन्द्रमुख्यदिविजप्राञ्चत्किरीटाग्रसं-
सर्गानेकमणिप्रभाकरसहस्राभं पदाम्भोरुहे।
दुर्गासन्ततसंस्तुताङ्घ्रिकमलं दुर्वारकोदण्डिनं
गङ्गाविस्फुटमौलिमानसहरं कल्याणरामं भजे।।४७।।

In Public domain. Digitization Muthulakshmi Research Academy

अग्रे प्राञ्जलिमाञ्जनेयमनिशं वीरं च तारासुतं
पार्श्वे पङ्क्तिमुखानुजं परिसरे सुग्रीवमग्रासने।
पश्चाल्लक्ष्मणमन्तिके जनकजां मध्ये स्थितं राघवं
चिन्तातूलिकया लिखन्ति सुधियश्चित्तेषु पीताम्बरम्॥४८॥

क्षीराम्भोनिधिमध्यवर्तिनि सिते द्वीपे सुवर्णाचले
रत्नोल्लासितकल्पभूरुहतले जाम्बूनदे मण्टपे।
तेजोभ्राजितवेदिके सुरुचिरे माणिक्यसिंहासने
हेमाम्भोरुहकर्णिकोपरितले वीरासनस्थं भजे॥४९॥

दोर्दण्डेन च कुण्डलीकृतमहाकोदण्डचण्डाशुगै
र्दुर्वारै रविकोटितुल्यनिशितैर्ब्रह्मादिदेवैस्स्तुतैः।
सुग्रीवादिसमस्तवानरवरानाज्ञापयन्तं गिरा
दैत्यान् ताडय ताडयेत्यनुपदं श्रीरामचन्द्रं भजे॥५०॥

भूकम्पं जनयन्नभोविदलयन्नम्भोनिधिं क्षोभयन्
दैतेयांश्च विमर्दयन् गिरिवरान् भिन्दन् दिशः पूरयन्।
वैदेहीमतिमोदयन् सकलगीर्वाणान् शिरः कम्पयन्
कल्याणो रघुरामहस्तविलसत्कोदण्डचण्डध्वनिः॥५१॥

विमलकमलनेत्रं विस्फुरन्नीलगात्रं
तपनकुलपवित्रं दानवध्वान्तमित्रम्।
भुवनशुभचरित्रं भूमिपुत्रीकलत्रं
दशरथवरपुत्रं नौमि रामाख्यमित्रम्॥५२॥

जननी जानकी साक्षाज्जनको रघुनन्दनः।
लक्ष्मणो मित्रमस्माकं को विचारः कुतो भयम्॥५३॥

जनको रामचन्द्रो मे जननी जनकात्मजा।
हनुमत्प्रमुखास्सर्वे हरयो मम बान्धवाः॥५४॥

In Public domain. Digitization Muthulakshmi Research Academy

जगति विशदमन्त्रं जानकीप्राणमन्त्रं
विबुधविनुतमन्त्रं विश्वविख्यातमन्त्रम्।
दशरथसुतमन्त्रं दैत्यसंहारमन्त्रं
रघुपतिनिजमन्त्रं रामरामेति मन्त्रम्॥५५॥

सीताया दक्षिणे पार्श्वे लक्ष्मणस्य च पार्श्वतः।
तन्मध्ये राघवं वन्दे धनुर्बाणधरं हरिम्॥५६॥

चन्द्रोपमं मलयचन्दनचर्चिताङ्गं
मन्दारपुष्पपरिपूजितपादपद्मम्।
ब्रह्मेन्द्रवन्द्यमनिशं मुनिबृन्दसेव्यं
वन्देऽरविन्दनयनं रघुरामचन्द्रम्॥५७॥

इक्ष्वाकुनन्दनं सुग्रीवपूजितं त्रैलोक्यरक्षकं सत्यसन्धं सदा।
राघवं रघुपतिं राजीवलोचनं रामचन्द्रं भजे राघवेशं भजे॥५८॥

ब्रह्मामृतानन्दफलप्रदायिनं वेदान्तविज्ञानसुगन्धपुष्पितम्।
सीताशुभाङ्गाञ्चितबाहुशाखिनं श्रीरामकल्पद्रुममाश्रयामः*॥५९॥

कनकनिकषभासा सीतयालिङ्गिताङ्गो
नवकुवलयदामश्यामवर्णाभिरामः।
अभिनवयुतविद्युन्नन्दितो मेघखण्ड-
श्शमयतु मम तापं सर्वदा रामचन्द्रः॥६०॥

अलं शास्त्राभ्यासैरलमसकृदाम्नायपठनै-
रलं तीर्थस्नानैरलमखिलयागव्रतजपैः।
अलं योगाभ्यासैरलमपि महापातकभिया
यदस्माकं रामस्मरणमहिमाऽयं विजयते॥६१॥

सीतामनोमानसराजहंस संसारसन्तापहर क्षमस्व।
श्रीराम दैत्यान्तक शान्तरूप श्रीतारकब्रह्म नमो नमस्ते॥६२॥

* यामहे

In Public domain. Digitization Muthulakshmi Research Academy

कदा वा साकेते विमलसरयूतीरपुलिने
समासीनश्श्रीमद्रघुपतिपदाब्जे हृदि भजन्।
अये राम स्वामिन् जनकतनयावल्लभ विभो
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान्॥६३॥

कदा वा साकेते तरुणतुलसीकाननतले
निविष्टस्तं पश्यन्नविहतविशालोर्ध्वतिलकम्।
अये सीतानाथ स्मृतजनपते दानवजयिन्
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान्॥६४॥

कदा वा साकेते मणिखचितसिंहासनतले
समासीनं रामं जनकतनयालिङ्गिततनुम्।
अये सीताराम त्रुटितहरधन्वन् रघुपते
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान्॥६५॥

मार्गे मार्गे शाखिनां रत्नवेदी
वेद्यां वेद्यां किन्नरीबृन्दगीतम्।
गीते गीते मञ्जुलालापगोष्ठी
गोष्ठ्यां गोष्ठ्यां त्वत्कथा रामचन्द्र!॥६६॥

वृक्षे वृक्षे वीक्षिताः पक्षिसङ्घा
स्सङ्घे सङ्घे मञ्जुलामोदवाक्यम्।
वाक्ये वाक्ये मञ्जुलालपगोष्ठी
गोष्ठ्यां गोष्ठ्यां त्वत्कथा रामचन्द्र!॥६७॥

श्वेतपुष्पकमारुह्य सीतया सह राघव।
सुग्रीवादिभवद्भक्तैर्मनोमध्ये रमस्व मे॥६८॥

In Public domain. Digitization Muthulakshmi Research Academy

दोर्भिः खड्गं त्रिशूलं डमरुमसिदनुश्चारुबाणं कुठारं
शङ्खं चक्रं च खेटं हलमुसलगदाभिण्डिवालं च पाशम्।
विद्युद्वह्नेश्च मुष्टिं त्वभयवरकरं बिभ्रतं शुभ्रवर्णं
वन्दे रामं त्रिनेत्रं सकलरिपुकुलं मर्दयन्तं प्रतापैः ॥६९॥

दुरिततिमिरचन्द्रो दुष्टकञ्जातचन्द्र
स्सुरकुवलयचन्द्रस्सूर्यवंशाब्धिचन्द्रः।
स्वजननिवहचन्द्रश्शत्रुराजीवचन्द्रः
प्रणतकुमुदचन्द्रः पातु मां रामचन्द्रः ॥७०॥

कल्याणदं कौशिकयज्ञपालं कलानिधिं काञ्चनशैलधीरम्।
कञ्जातनेत्रं करुणासमुद्रं काकुत्स्थरामं कलयामि चित्ते॥७१॥

वाल्मीकिस्मृतिमन्दरेण मथितस्सीतारमासम्भव-
[१]स्सुग्रीवाङ्गद जाम्बवादिपदपस्सौमित्रिचन्द्रोदयः।
वातोत्पन्नमणिर्विभीषणसुधः पौलस्त्यहालहल
श्श्रीरामायणदुग्धवार्धिरमलो भूयात् सुखश्रेयसे॥७२॥

रघुनन्दन एव दैवतं नो रघुवंशोद्भव एव दैवतं नः।
भरताग्रज एव दैवतं नो भगवान् राघव एव दैवतं नः ॥७३॥

उत्फुल्लामलकोमलोत्पलदलश्यामाय रामामनः
कामाय प्रशमाय निर्मलगुणारामाय रामात्मने।
ध्यानारूढमुनीन्द्रमानससरोहंसाय संसारवि-
ध्वंसायाद्भुततेजसे रघुकुलोत्तंसाय पुंसे नमः ॥७४॥

राजीवायतलोचनं रघुवरं नीलोत्पलश्यामलं
मन्दाराञ्चितमण्टपे सुललिते सौवर्णके पुष्पके।
आस्थाने नवरत्नराजिखचिते सिंहासने संस्थितं
सीतालक्ष्मणलोकपालसहितं वन्दे मुनीन्द्रास्पदम्॥७५॥

१.सुग्रीवामरभूरुहोऽङ्गदगजः

In Public domain. Digitization: Muthulakshmi Research Academy

वल्लीप्रवालनवपल्लवपादपद्मं
कञ्जेक्षणं जलदनीलसरोरुहाभम्।
सीमन्तिनीनयनमोहनमूलमन्त्रं
रामं नमामि मुनिमानसराजहंसम्॥७६॥

अलं विवादेन न मानुषोऽयं
रामात्मना राक्षसमर्दनाय।
भुजङ्गशय्यां परिमुच्य साक्षा-
न्नारायणो भूतलमाजगाम॥७७॥

लोकत्राणानुकारी दशवदनशिरःपङ्क्तिविच्छेदकारी
लङ्कालङ्कारकारी भृगुतनयमनस्सर्वगर्वापहारी।
सीतासीमन्तकारी मणिमयमकुटो दिव्यकोदण्डधारी
श्रीरामः पापहारी शमयतु दुरितं भूमिभारापहारी॥७८॥

ब्रह्मादियोगिमुनिपूजितसिद्धमन्त्रं
दारिद्यदुःखभवरोगविनाशमन्त्रम्।
संसारसागरसमुत्तरणैकमन्त्रं
वन्दे महाभयहरं रघुराममन्त्रम्॥७९॥

शत्रुच्छेदैकमन्त्रं सरसमुपनिषद्वाक्यसम्पूज्यमन्त्रं
संसारोत्तारमन्त्रं समुचितसमये सङ्गनिर्याणमन्त्रम्।
सर्वैश्वर्यैकमन्त्रं व्यसनभुजगसन्दष्टसन्त्राणमन्त्रं
जिह्वे! श्रीराममन्त्रं जप जप सततं जन्मसाफल्यमन्त्रम्॥८०॥

आकर्णमारूढधनुर्गुणाढ्यं ब्रह्मास्त्रखण्डीकृतराक्षसेन्द्रम्।
रथाधिरूढं रणरङ्गधीरं रामं भजे रक्तसरोरुहाक्षम्॥८१॥

In Public domain. Digitization Muthulakshmi Research Academy

एतौ तौ दशकण्ठकण्ठकदलीकान्तारकान्तिच्छिदौ
वैदेहीकुचकुम्भकुङ्कुमलसत्पङ्कारुणालङ्कृतौ।
विश्वत्राणनिदानसाधुसवनप्रारम्भयूपौ भुजौ
देयास्तामुरुविक्रमौ रघुपते! श्रेयांसि भूयांसि नः ॥८२॥

वामाङ्कोपरि संस्थितावनिसुतामामुक्तभूषोज्ज्वलां
पश्यन्तं परिपूर्णचन्द्रवदनं भ्राजत्किरीटोज्ज्वलम्।
आसीनं नवरत्नराजिखचिते सिंहासने राघवं
सुग्रीवाङ्गदलक्ष्मणानिलसुतैरासेव्यमानं भजे ॥८३॥

जानाक्याः कमलामलाञ्जलिपुटे याः पद्मरागायिताः
न्यस्ता राघवमस्तके तु विलसत्कुन्दप्रसूनायिताः।
स्रस्ताश्श्यामलकायकान्तिकलिता या इन्द्रनीलायिता
मुक्तास्ताश्शुभदा भवन्तु भवतां श्रीरामवैवाहिकाः ॥८४॥

नित्यं श्रीराममन्त्रं निरुपममधिकं नीतिसुज्ञानमन्त्रं
सत्यं श्रीराममन्त्रं सदमलहृदये सर्वदाऽरोग्यमन्त्रम्।
स्तुत्यं श्रीराममन्त्रं सुललितसुमनस्सौख्यसौभाग्यमन्त्रं
पठ्यं श्रीराममन्त्रं पवनजवरदं पातु मां राममन्त्रम् ॥८५॥

व्यामोहप्रशमौषधं मुनिमनोवृत्तिप्रवृत्त्यौषधं
दैत्योन्मूलकरौषधं भवभयप्रध्वंसनैकौषधम्।
भक्तानन्दकरौषधं त्रिभुवनीसञ्जीवनैकौषधं
श्रेयःप्राप्तिकरौषधं पिब मनः श्रीरामनामौषधम् ॥८६॥

ध्याये प्रातस्सुरेशं रविकुलतिलकं रञ्जितानन्तलोकं
बालं बालारुणाक्षं भवमुखविनुतं भावगम्यं भवघ्नम्।
दीव्यन्तं स्वर्णक्लृप्तैर्मणिगणनिकरैर्भूषणैरुज्ज्वलाङ्गं
कौसल्यादेहजातं मम हृदयगतं राममीषत्स्मितास्यम् ॥८७॥

In Public domain. Digitization Muthulakshmi Research Academy

मध्याह्ने रामचन्द्रं मणिगणललितं मन्दहासावलोकं
मार्तण्डानेकभासं मरकतनिकराकारमानन्दमूर्तिम्।
सीतावामाङ्कसंस्थं सरसिजनयनं पीतवासो वसानं
वन्देऽहं वासुदेवं वरशरधनुषं मानसे मे विभान्तम्॥८८॥

ध्याये रामं सुधांशुं नतसकलभवारण्यतापप्रहारं
श्यामं शान्तं सुरेन्द्रं सुरमुनिविनुतं कोटिसूर्यप्रकाशम्।
सीतासौमित्रिसेव्यं सुरनरसुगमं दिव्यसिंहासनस्थं
सायाह्ने रामचन्द्रं स्मितरुचिरमुखं सर्वदा मे प्रसन्नम्॥८९॥

केयूराङ्गदकङ्कणैर्मणिगणैर्वैरोचमानं सदा
राकापार्वणचन्द्रकोटिसदृशं छत्रेण वैराजितम्।
हेमस्तम्भसहस्रषोडशयुते मध्ये महामण्टपे
देवेशं भरतादिभिः परिवृतं रामं भजे श्यामलम्॥९०॥

विहाय कोदण्डमिमं मुहूर्तं
गृहाण पाणौ मणिचारुवेणुम्।
मयूरबर्हं च निजोत्तमाङ्गे
सीतापते राघव रामचन्द्र॥९१॥

शुद्धान्ते मातृमध्ये दशरथपुरतस्सञ्चरन्तं परं तं
काञ्चीदामानुविद्धप्रतिमणिविलसत्किङ्किणीनिक्वणाङ्गम्।
पाले मुक्ताललामं पदयुगनिनदन्नूपुरं चारुहासं
बालं रामं भजेऽहं प्रणतजनमनःखेदविच्छेददक्षम्॥९२॥

सम्पूर्णचन्द्रवदनं सरसीरुहाक्षं
माणिक्यकुण्डलधरं मकुटाभिरामम्।
चाम्पेयगौरवसनं शरचापहस्तं
श्रीरामचन्द्रमनिशं मनसा स्मरामि॥ ९३ ॥

In Public domain. Digitization Muthulakshmi Research Academy

इन्द्रनीलमणिसन्निभदेहं वन्दनीयमसकृन्मुनिबृन्दैः।
लम्बमानतुलसीवनमालं चिन्तयामि सततं रघुवीरम्।। ९४।।

रामचन्द्र दयासान्द्र रघुवीर नृपोत्तम।
लोचनाभ्यां कृपापूरपूर्णाभ्यां मां विलोकय।। ९५ ।।

रामेति वर्णद्वयमादरेण सदा स्मरन् मुक्तिमुपैति जन्तुः।
कलौ युगे कल्मषमानसानामन्यत्र धर्मे खलु नाधिकारः ।।९६।।

सकलभुवनरत्नं सर्वशास्त्रार्थरत्नं
समरविजयरत्नं सच्चिदानन्दरत्नम्।
दशमुखहररत्नं दानवारातिरत्नं
रघुकुलनृपरत्नं पातु मां रामरत्नम्।। ९७।।

मातुः पार्श्वे चरन्तं मणिमयशयने मञ्जुभूषाञ्चिताङ्गं
मन्दं मन्दं पिबन्तं मुकुलितनयनं स्तन्यमन्यस्तनाग्रम्।
अङ्गुल्यग्रैः स्पृशन्तं सुखपरवशया सस्मितालिङ्गिताङ्गं
गाढं गाढं जनन्या कलयतु हृदयं मामकं रामबालम्।। ९८।।

रामाभिरामं नयनाभिरामं वाचाभिरामं वदनाभिरामम्।
सर्वाभिरामं च सदाभिरामं वन्दे सदा दाशरथिं च रामम्।। ९९।।

जय जय रघुराम श्रीमुखाम्भोजभानो
जय जय रघुवीर श्रीमदम्भोजनेत्र।
जय जय रघुनाथ श्रीकराभ्यर्चिताङ्घ्रे
जय जय रघुवर्य श्रीश कारुण्यसिन्धो।। १०० ।।

जय जय वरशङ्खश्रीगदाचक्रधारिन्
जय जय निजदासप्रार्थितार्थप्रदायिन्।
त्रिभुवनगतसर्वप्राणिभावज्ञ विष्णो!
शरणमुपगतोऽहं त्वां शरण्यं वरेण्यम्।। १०१।।

In Public domain. Digitization Muthulakshmi Research Academy

वेदवेद्ये परे पुंसि जाते दशरथात्मजे।
वेदः प्राचेतसादासीत् साक्षाद्रामायणात्मना।। १०२।।

श्रीरामेत्येकदा वक्तुं मनो यस्य प्रवर्तते।
वैकुण्ठवासिनस्तस्य कुलमेकोत्तरं शतम्।।१०३ ।।

राशब्दोच्चारमात्रेण मुखान्निर्यान्ति पातकाः
पुनः प्रवेशभीत्या च मकारस्तु कवाटवत्।। १०४।।

श्रीरामायणमादिकाव्यमृषिणा वाल्मीकिना निर्मितं
वेदान्तार्थविशारदैरनुदिनं स्तुत्यं सुरैरर्चितम्।
श्रोतॄणामघनाशनं सुरतरोस्तुल्यं तु मुक्तिप्रदं
ये श्रुण्वन्ति पठन्ति रामचरितं ते यान्ति विष्णोः पदम्।। १०५।।

*****

In Public domain. Digitization: Muthulakshmi Research Academy

द्वितीयाश्वासः

श्रीरामं जनकक्षितीश्वरसुतावक्त्राम्बुजातारुणं
श्रीमद्भानुकुलाब्धिकौस्तुभमणिं श्रीरत्नवक्षःस्थलम्।
श्रीकण्ठाद्यमरौघरत्नमकुटालङ्कारपादाम्बुजं
श्रीवत्सोज्ज्वलमिन्द्रनीलसदृशं श्रीरामचन्द्रं भजे।। १।।

श्रीरङ्गेशपदाब्जलग्नहृदयं श्रीशङ्खचक्रान्वितं
श्रीमन्निर्जरपादपस्फुटपदंश्रीसिंहपीठस्थितम्।
श्रीवैकुण्ठसहस्रमस्तकलसद्भोगासने शायिनं
श्रीभूमीसुतयायुतं श्रितनिधिं श्रीराममूर्तिं भजे।। २।।

आनन्दकन्दमरुणाधरमम्बुजाक्ष-
मापीतवस्त्रमतसीकुसुमोज्ज्वलाङ्गम्।
अक्षान्तवर्णमकलङ्कममेयमाद्यं
मर्त्याकृतिं रघुपतिं शरणं गतोऽस्मि।।३।।

साकेते नवरत्नपङ्क्तिखचिते चित्रध्वजालंकृते
वासे स्वर्णमये दलाष्टललिते पद्मे विमानोत्तमे।
आसीनं भरतादिसोदरजनैश्शाखामृगैः किन्नरै-
र्दिक्पालैर्मुनिपुङ्गवैर्नृपगणैस्संसेव्यमानं भजे।।४।।

कन्दर्पायुतकोटिकोटितुलितं कालाम्बुदश्यामलं
कम्बुग्रीवमुदारकौस्तुभधरं कर्णावतंसोत्पलम्।
कस्तूरीतिलकोज्ज्वलं स्मितमुखं चिन्मुद्रयालङ्कृतं
सीतालक्ष्मणवायुपुत्रसहितं सिंहासनस्थं भजे।।५।।

वराभयं दिव्यरथाङ्गशङ्खं सकौस्तुभं वेष्टितपीतवस्त्रं।
किरीटहाराङ्गदकुण्डलाङ्गं श्रीवत्सचिह्नं शिरसा नमामि।।६।।

In Public domain. Digitization Muthulakshmi Research Academy

दिगम्बर किङ्किणिमेखलोज्ज्वलं ललाटपर्यन्तविलम्बितालकं।
स्खलद्वचस्कं कमनीयनूपुरद्वयं शिशुं राममहं नमामि ॥७॥

मन्दारमूले मणिपीठसंस्थं सुधाप्लुतं दिव्यविराट्स्वरूपम्।
सबिन्दुनादान्तकलान्ततूर्यमूर्तिं भजेऽहं रघुवंशरत्नम्॥८॥

अनर्घ्यमाणिक्यविराजमानश्रीपादुकालङ्कृतशोभनाभ्याम्।
अशेषबृन्दारकवन्दिताभ्यां नमो नमो रामपदाम्बुजाभ्याम् ॥९
ध्वजाम्बुजच्छत्ररथाङ्गशङ्खदम्भोलिपाशाङ्कुशमत्स्यचिह्नं
ब्रह्मेन्द्रदेवादिकिरीटकोटिसङ्घृष्टपादाम्बुजयुग्ममीले॥९अ॥

ललाटदेशोज्ज्वलबालभूषणं सताण्डवं व्याघ्रनखाङ्ककन्धरम्।
दिगम्बरं शोभितबर्बरालकं श्रीबालरामं शिरसा नमामि॥१०॥

शताष्टदिव्यस्थलमूर्तिवन्दितं शतक्रतुब्रह्ममरुद्गणार्चितं ।
शशाङ्कवैश्वानरभानुमण्डलस्थितं भजेऽहं रघुवंशवर्धनम्॥११॥

कर्णान्तविश्रान्तधनुर्गुणाङ्ककलम्ब[1]लक्षीकृतराक्षसेशम्।
वृद्धश्श्रवस्स्यन्दनमध्यसंस्थं रूक्षेक्षणं राममहं नमामि॥१२॥
सुत्रामनीलोत्पलनीलमेघश्रीजित्वराङ्गं सुतया धरण्याः।
युक्तं सुरेन्द्रावनमानसं तं रामं भजे राक्षसवंशनाशम्॥१३॥

राकाचन्द्रनिभाननं रतिपतिद्वेषिप्रियं राक्षसा-
धीशग्रीवविभेदनस्फुटपटुप्रख्यातबाणोज्ज्वलम्।
रत्नालङ्कृतपादुकाञ्चितपदाम्भोजं रमावल्लभं
रागद्वेषविहीनचित्तसुलभं रामं भजे तारकम्॥१४॥

आलोलस्फुटरत्नकुण्डलधरं आविस्मितालङ्कृतं
आधारादिकचक्रमण्डलगतं आनन्दकन्दाङ्कुरम्।
आविर्भूतकृपातरङ्गजलधिं आक्षान्तवर्णाश्रयं
आपन्नार्तिनिदाघमेघसमयं रामं भजे तारकम्॥१५॥

१. कलम्बः - बाणः

In Public domain. Digitization Muthulakshmi Research Academy

साकेतान्तररत्नमण्टपमहामाणिक्यसिंहासने
तन्मध्येऽष्टदलाम्बुजे स्फुटतरे चित्कर्णिके संस्थितं
सौमित्र्यम्बुजमित्रसूनुभरतश्रीवायुपुत्रैर्वृतं
मुद्रालङ्कृतपाणिसारसमजं रामं भजे तारकम्॥१६॥

विराजमानोज्ज्वलपीतवाससं विशालवक्षस्स्थलकौस्तुभश्रियं।
भजे किरीटाङ्गदरत्नकुण्डलं हरिं तुलस्या वनमालयाङ्कितम्॥१७॥

मूलादिषट्सरसिजांतसहस्रपद्म-
पत्रान्तरालनिलयं भवबन्धनाशम्।
नादान्तचन्द्रगलितामृतसिक्तदेहं
नादान्तनादमहिमास्पदराममीले॥१८॥

वन्दे पितामहमहावरदानगर्व
लङ्काधिनाथकुलपर्वतनाशवज्रम्।
तं रावणानुजमरुत्सुतभानुसूनु-
दिक्पालसोदरगणैः परिसेव्यमानम्॥१९॥

अज्ञानगाढतिमिरापहभानुमूर्ति-
मारक्तचारुनयनांम्बुजमादिबीजम्।
अम्भोधिमध्यवटपत्रशयानमादि-
मध्यान्तशून्यमखिलास्पदरामचन्द्रम्॥२०॥

सुधासमुद्रान्तविराजमाने द्वीपे सिते चन्दनपारिजाते।
महासने पन्नगतल्पमध्ये निषण्णमीले रघुवंशरत्नम्॥२१॥

स्मितानने पद्मदलायतेक्षणं
विनीलमाणिक्यजिदङ्गशोभितम्।
जटाकिरीटं शरशापलाञ्छनं
नमाम्यहं भानुकुलाब्धिकौस्तुभम्॥२२॥

प्रसूनबाणाङ्कितमिक्षुचापं
In Public domain. Digitization Muthulakshmi Research Academy
चक्राब्जपाशाङ्कुशवंशनालम्।
करैर्दधानं घननीलवर्णं
श्रीकृष्णरूपं प्रणमामि रामम्॥२३॥

*बहूरुपादोदरवक्त्रलोचनं
दीप्तप्रचण्डानलदुर्निरीक्ष्यम्।*
अशेषबृन्दारकनागगोचरं
भजामि ते राघव विश्वरूपम्॥२४॥

सहस्रनेत्राननपादबाहुमनन्तवीर्यं रविकोटितुल्यम्।
स्रक्चन्दनालङ्कृतदिव्यदेहं भजाम्यहं ते हरिविश्वरूपम्॥२५॥

कलम्बकोदण्डगदाब्जसंयुतं दंष्ट्राकरालाङ्कधनंजयाननम्।
पीतांशुकस्वर्णकिरीटकुण्डलं भजामि ते राघव विश्वरूपम्॥२६॥

कोदण्डमि[illegible] जनितं स्मरपञ्चबाणं
शङ्खं रथावयवमङ्कुशपाशवेणुम्।
हस्तैर्दधानममलद्युतिमुद्वहन्तं
प्रद्युम्नकृष्णमनिशं भज रामचन्द्रम्॥२७॥

सीतालोकनतत्परं मणिनिभं व्याख्यानमुद्राञ्चितं
वामे जानुनि लम्बहस्तमनिशं वीरासने संस्थितम्।
मूले कल्पतरोरनादिमुनिभिर्ब्रह्मादिभिस्सेवितं
मुक्ताहारकिरीटकुण्डलधरं मूर्धाभिषिक्तं भजे॥२८॥

यद्रूपमानन्दकरं मुनीनां यद्बाणमाखण्डलशत्रुनाशम्।
यद्दैवतं सर्वजनान्तरस्थं तत्सर्वरूपं रघुनाथमीले॥२९॥

* बाहूरु

* दीप्तप्रचण्डानलदुर्निरीक्षणम्

In Public domain. Digitization Muthulakshmi Research Academy

नादं नादविलीनचित्तपवनं नादान्ततत्त्वप्रियं
नामाकारविवर्जितं नवघनश्यामाङ्गनादप्रियम्।
नादाम्भोजमरन्दमत्तविलसद्भृङ्गं मदन्तस्स्थितं
नादान्तध्रुवमण्डलाब्जरुचिरं रामं भजे तारकम्॥३०॥

नानाभूतहृदब्जपद्मनिलयं नामोज्ज्वलाभूषणं
नामस्तोत्रपवित्रितत्रिभुवनं नारायणाष्टाक्षरम्।
नादान्तेन्दुगलत्सुधाप्लुततनुं नानात्मचिन्मात्रकं
नानाकोटियुगान्तभानुसदृशं रामं भजे तारकम्॥३१॥

खश्यामं खगवाहनं खररिपुं खाद्यादिभूतात्मकं
खातीतं खगमन्त्रतत्परपदं खद्योतकोट्युज्ज्वलम्।
खावाच्यं खगकेतनं खगमनं खर्वाटशृङ्गालयं
खाराद्यं च खरन्ध्रपीठनिलयं रामं भजे तारकम्॥३२॥

वेद्यं वेदगुरुं विरिञ्चिजनकं वेदान्तमूर्तिं स्फुर-
द्वेदं वेदकलापमूलमहिमाधारान्तकन्दाङ्कुरम्।
वेदशृङ्गसमानशेषशयनं वेदान्तवेद्यात्मकं
वेदाराधितपादपङ्कजमहं रामं भजे तारकम्॥३३॥

मूलाधारधनञ्जयस्फुटपटुज्वालासमालिङ्गितं
मूर्धन्यान्तशशाङ्कमण्डलगलत् क्षीराभिषेकप्रियम्।
मुक्ताशोभितमौलिभिर्मुनिवरैराराधितं भावये
प्रख्यातैस्त्रिगणैर्जनाधिपगणै श्शाखामृगैर्देवतैः॥३४॥

ताराकारविमानमध्यनिलयं तत्त्वत्रयाराधितं
ताराद्रीश्वरयोगिनिर्गुणमहासिद्धैस्समाराधितम्।
तत्संज्ञं तरुणेन्दुशेखरसखं तारात्रयान्तर्गतं
तप्तस्वर्णकिरीटकुण्डलयुगं रामं भजे तारकम्॥३५॥

In Public domain. Digitization Muthulakshmi Research Academy

तारं तारकमण्डलोपरिलसज्ज्योतिः स्फुरत्तारका-
तीतं तत्त्वमसीति वाक्यमहिमाधारं तटित्सन्निभम्।
तत्त्वज्ञानपवित्रितत्रिभुवनं तारासनान्तर्गतं
तारान्तध्रुवमण्डलाब्जरुचिरं रामं भजे तारकम्॥३६॥

कस्तूरीघनसारकुङ्कुमलसच्चच्छ्रीचन्दनालङ्कृतं
कन्दर्पाधिकसुन्दरं घननिभं काकुत्स्थवंशध्वजम्।
कल्याणाम्बरवेष्टितं कमलया युक्तं कलावल्लभं
कल्याणाचलकार्मुकप्रियसखं कल्याणरामं भजे॥३७॥

मज्जीवं मदनुग्रहं मदधिपं मद्भावनं मत्सुखं
मत्तातं मम सद्गुरुं मम वरं मोहान्ध्यविच्छेदनम्।
मत्पुण्यं मदनेकबान्धवजनं मज्जीवनं मन्निधिं
मत्सिद्धिं मम सर्वकर्मसुकृतं रामं भजे तारकम्॥३८॥

नित्यं नीरजलोचनं निरुपमं नीवारशूकोपमं
निर्भेदानुभवं निरन्तरगुणं नीलाङ्गरागोज्ज्वलम्।
निष्पापं निगमागमार्चितपदं नित्यात्मकं निर्मलं
निष्पुण्यं निखिलं निरञ्जनपदं रामं भजे तारकम्॥३९॥

ध्याये त्वां हृदयाम्बुजे रघुपतिं विज्ञानदीपाङ्कुरं
हंसो हंसपरम्परादिमहिमाधारं जगन्मोहनम्।
हस्ताम्भोजगदाब्जचक्रमतुलं पीताम्बरं कौस्तुभं
श्रीवत्सं पुरुषोत्तमं मणिनिभं रामं भजे श्यामलम्॥४०॥

सत्यज्ञानमनन्तमच्युतमजं चाव्याकृतं तत्परं
कूटस्थादिसमस्तसाक्षिमनघं साक्षाद्विराट्तत्त्वदम्।
वेद्यं विश्वमयं स्वलीनभुवनं स्वाराज्यसौख्यप्रदं
पूर्णं पूर्णतरं पुराणपुरुषं रामं भजे तारकम्॥४१॥

In Public domain. Digitization Muthulakshmi Research Academy

रामं राक्षसवंशनाशनकरं राकेन्दुबिम्बाननं
रक्षोऽरिं रघुवंशवर्धनकरं रक्ताधरं राघवम्।
राधास्वात्मनिवासिनं रविनिभं रम्यं रमानायकं
रन्ध्रान्तर्गतशेषशायिनमहं रामं भजे तारकम्।।४२।।

ताराकारं निखिलनिलयं तत्वमस्यादिलक्ष्यं
शब्दावाच्यं त्रिगुणरहितं व्योममङ्गुष्ठमात्रम्।
निर्वाणाख्यं सगुणमगुणं व्योमरन्ध्रान्तरस्थं
सौषुम्नान्तः प्रणवसहितं रामचन्द्रं भजेऽहम्।।४३।।

मुक्तेर्मूलं मुनिवरहृदानन्दकन्दं मुकुन्दं
कूटस्थाख्यं सकलवरदं सर्वचैतन्यरूपम्।
नादातीतं कमलनिलयं नादनादान्ततत्त्वं
नादातीतं प्रकृतिरहितं रामचन्द्रं भजेऽहम्।।४४।।

निजानन्दाकारं निगमतुरगाराधितपदं
परब्रह्मानन्दं परमपदगं पापहरणम्।
कृपापारावारं परमपुरुषं पद्मनिलयं
भजे रामं श्यामं प्रकृतिरहितं निर्गुणमहम्।।४५।।

श्रीमद्वैकुण्ठनाथं सुरमुनिमकुटद्योतितस्वर्णपीठं
नीलाङ्गं चन्द्रवक्त्रं मणिमयमकुटं बाणकोदण्डहस्तम्।
पद्माक्षं पापनाशं प्रणवमयमहारत्नसिंहासनस्थं
श्रीसीतावामभागं श्रितजनवरदं रामचन्द्रं भजेऽहम्।।४६।।

साकेते मणिमण्टपे सुरतरुप्रान्ते विमानान्तरे
पद्मे चाष्टदलोज्ज्वले नुतमहासौधे सुधामान्विते।
सत्यं सूर्यजरावणानुजमरुत्पुत्रानुजैस्सेवितं
मध्ये वासवनीलकोमलतनुं रामं भजे तारकम्।।४७।।

In Public domain. Digitization Muthulakshmi Research Academy

हृदयकुहरमध्यद्योतितन्मन्त्रसारं
निगमनियमगम्यं वेदशास्त्रैरचिन्त्यम्।
हरिहरविधिवन्द्यं हंसमन्त्रान्तरस्थं
दशरथसुतमीले दैवतं देवतानाम्॥४८॥

देवेन्द्रनीलनवमेघविजित्वराङ्गं
पूर्णेन्दुबिम्बवदनं शरचापहस्तम्।
सीतासमेतमनिशं शरणं शरण्यं
चेतो मदीयमभिवाञ्छति रामचन्द्रम्॥४९॥

ओतप्रोतसमस्तवस्तुनिचयं चोङ्कारबीजाक्षरं
ओङ्कारप्रकृतिं षडक्षरहितं चोङ्कारकन्दाङ्कुरम्।
ओङ्कारस्फुटभूर्भुवस्सुवरितं त्वोघत्रयाराधितं
आङ्कारोज्ज्वलसिंहपीठनिलयं रामं भजे तारकम्॥५०॥

साकेते धवले सुरद्रुमतले सौधे विमानान्तरे
चादिक्षान्तसमस्तवर्णकमले दिव्ये मृगेन्द्रासने।
ओङ्कारोज्ज्वलकर्णिके सुरसरिन्मध्ये सदेवान्तरे
व्यासाद्यादिमुनीश्वरैरभिमतं रामं भजे तारकम्॥५१॥

कोदण्डदीक्षागुरुमादिमूलं गुणाश्रयं चन्दनकुङ्कुमाक्तंङ्कितम्।
सलक्ष्मणं सर्वजनान्तरस्थं परात्परं राममहं नमामि॥५२॥

(षट्कमलस्थितश्रीरामस्तुतिः)

मूलाधारसरोरुहे हुतवहस्थाने त्रिकोणान्तरे
कन्दे कुण्डलिका सुषुप्तिपटले वासान्तवर्णाश्रये।
बालार्कप्रतिमं वराभयकरं पाशाङ्कुशालङ्कृतं
भूतस्वाश्रयमादिपूरुषमजं रामं भजे तारकम्॥५३॥

In Public domain. Digitization Muthulakshmi Research Academy

स्वाधिष्ठानसरोरुहे प्रविलसद्बालान्तवर्णाश्रये
ब्रह्मग्रन्थिमहोन्नते करतले श्रीकुण्डिकामालिकाम्।
पीठे रत्ननिभे वराभयकरं वाणीयुतं बिभ्रतं
साक्षाद्बोधमनन्यमङ्गलकरं रामं भजे तारकम्।।५४।।

डापान्ताक्षरपङ्कजे दशदले माणिक्यसम्पूरिते
विष्णुग्रन्थिमये वराभयकरं श्रीशङ्खचक्रान्वितम्।
मार्तण्डद्युतिमञ्जुलाभमतुलं पीताम्बरं कौस्तुभं
सर्वं सर्वगमिन्दिरासहचरं रामं भजे तारकम्।।५५।।

हृत्पद्मे विलयार्ककोटिसदृशं काठान्तवर्णोज्ज्वले
प्रणान्तप्रणवान्तरे प्रविलसद्दोर्बाणपीठान्तरे।
सूर्यं हंसमयं सदाशिवपदं कोदण्डदीक्षागुरुं
वासं मोक्षरमासमेतमनिशं रामं भजे तारकम्।।५६।।

साक्षात् षोडशदिव्यपत्रकमले जीवात्मसंस्थापिते
रुद्रग्रन्थिमये मनोन्मनिपथे जालन्ध्रपीठान्तरे।
शुभ्रज्योतिमयं शरीरसहितं सुस्थं सुधाशीतलं
शब्दब्रह्मनिवासभूतवदनं रामं भजे तारकम्।।५७।।

भ्रूमध्ये निगमागमोज्ज्वलपदे चन्द्रे त्रिमार्गान्तरे
निर्द्वन्दे निखिलार्थतत्त्वविलसत्सूक्ष्मे सुषुम्नोन्मुखे।
आसीनं प्रलयार्कभासुरपरंज्योतिस्स्वरूपात्मकं
वर्णाभ्यञ्चितमोक्षलक्ष्मिसहितं रामं भजे तारकम्।।५८।।

शीर्षाम्भोरुहकर्णिके निरुपमे श्रीषोडशारे शशि-
प्रख्यातामृतवार्धिवीचिलहरीनिर्वाणपीठान्तरे।
शब्दब्रह्मपरं चराचरगुरुं तेजः परं शाश्वतम्
सत्यासत्यमगोचरं हृदि सदा सीतासमेतं भजे।।५९।।

In Public domain. Digitization Muthulakshmi Research Academy

साकेते रविकोटिसन्निभमहाहर्म्ये सुसिंहासने
नानारत्नविनिर्मिते मुनिजनाकीर्णे सदा नन्दने।
देवाधीश्वरसंयुते निवसितं वामाङ्कसीतोज्ज्वलं
देवेन्द्रोपलनीलकोमलतनुं रामं भजे तारकम्॥६०॥

साकेते नगरे समस्तसुखदे हर्म्येऽब्जकोटिद्युतौ
नक्षत्रग्रहपङ्क्तिलग्नशिखरे चान्तर्यपङ्केरुहे।
वाल्मीक्यत्रिपराशरादिमुनिभिस्संसेव्यमानं स्थितं
सीतालङ्कृतवामभागमनिशं रामं भजे तारकम्॥६१॥

(वन्दे सदा राघवम्)

वन्दे राममनादिपूरुषमजं वन्दे रमानायकं
वन्दे हारकिरीटकुण्डलधरं वन्दे सुनीलद्युतिम्।
वन्दे चापकलम्बकोज्ज्वलकरं वन्दे जगन्मण्डलं
वन्दे पंक्तिरथात्मजं मम गुरुं वन्दे सदा राघवम्॥६२॥

वन्दे शौनकगौतमाद्यभिनुतं वन्दे घनश्यामलं
वन्दे तारकपीठमध्यनिलयं वन्दे जगन्नायकम्।
वन्दे भक्तजनौघदैवततरुं वन्दे धनुर्वल्लभं
वन्दे तत्त्वमसीतिवाक्यजनकं वन्दे सदा राघवम्॥६३॥
वन्दे सूर्यशशाङ्कलोचनयुगं वन्दे जगत्पावनं
वन्दे पत्रसहस्रपद्मनिलयं वन्दे पुरारिप्रियम्।
वन्दे राक्षसवंशनाशनकरं वन्दे सुधाशीतलं
वन्दे देवकपीन्द्रकोटिविनुतं वन्दे सदा राघवम्॥६४॥
वन्दे सागरगर्वभञ्जकशरं वन्दे जगज्जीवनं
वन्दे कौशिकयागरक्षणकरं वन्दे गुरूणां गुरुम्।
वन्दे बाणशरासनोज्ज्वलकरं वन्दे जटावल्कलं
वन्दे लक्ष्मणभूमिजान्वितमहं वन्दे सदा राघवम्॥६५॥

In Public domain. Digitization Muthulakshmi Research Academy

वन्दे पाण्डरपुण्डरीकनयनं वन्देऽब्जबिम्बाननं
वन्दे कम्बुगलं कराब्जयुगलं वन्दे ललामोज्ज्वलम्।
वन्दे पीतदुकूलमम्बुदनिभं वन्दे जगन्मोहनं
वन्दे कारणमानुषोज्ज्वलतनुं वन्दे सदा राघवम्॥६६॥

वन्दे नीलसरोजकोमलरुचिं वन्दे जगद्वन्दितं
वन्दे सूर्यकुलाब्धिकौस्तुभमणिं वन्दे सुराराधितम्।
वन्दे पातकपञ्चकप्रहरणं वन्दे जगत्कारणं
वन्दे विंशतिपञ्चतत्त्वरहितं वन्दे सदा राघवम्॥६७॥

वन्दे साधकवर्गकल्पकतरुं वन्दे त्रिमूर्त्यात्मकं
वन्दे नादलयान्तरस्थलगतं वन्दे त्रिवर्गात्मकम्।
वन्दे रागविहीनचित्तसुलभं वन्दे सभानायकं
वन्दे पूर्णदयामृतार्णवमहं वन्दे सदा राघवम्॥६८॥

वन्दे सात्त्विकतत्त्वमुद्रिततनुं वन्दे सुखाधायकं
वन्दे चारुचतुर्भुजं मणिनिभं वन्दे षडब्जस्थितम्।
वन्दे ब्रह्मपिपीलिकादिनिलयं वन्दे विराड्विग्रहं
वन्दे पन्नगतल्पशायिनमहं वन्दे सदा राघवम्॥६९॥

अयोध्यपुरमण्टपे स्फुरितसिंहपीठे स्थितं
वसिष्ठशुकगौतमैर्भृगुसुतादिभिस्सेवितम्।
दिनेशसुतरावणानुजसहोदराद्यावृतं
भजामि रघुनन्दनं प्रणवबीजसारात्मकम्॥७०॥

विलोलमणिकुण्डलं विमलचन्द्रबिम्बाननं
विखण्डितदशाननं विततचापबाणोज्ज्वलम्।
विमोहितजगत्त्रयं विकचपद्मपत्रेक्षणं
विभीषणसुरक्षकं विजयराममीले हरिम्॥७१॥

In Public domain. Digitization Muthulakshmi Research Academy

(दशरथात्मजं चिन्तये)

चलत्कनककुण्डलोल्लसितदिव्यगण्डस्थलं
चराचरजगन्मयं चरणपद्मगङ्गाश्रयम्।
चतुर्विधफलप्रदं चरमपीठमध्यस्थितं
चिदंशमखिलास्पदं दशरथात्मजं चिन्तये।।७२।।

सनन्दनमुनिप्रियं सकलवर्णवेदात्मकं
समस्तनिगमागमस्फुरिततत्त्वसिंहासनम्।
सहस्रनयानाब्जजाद्यमरबृन्दसंसेवितं
समष्टिपुरवल्लभं दशरथात्मजं चिन्तये।।७३।।

अनर्घमणिपूरकोल्लसित दिव्यतेजः परं
अनाहतसरोरुहस्फुरितहंसनादान्वितम्
अनन्तदलपङ्कजस्फुटमृगाङ्कबिम्बामृत-
प्लुताङ्गमखिलास्पदं दशरथात्मजं चिन्तये।।७४।।

जाग्रत्स्वप्नसुषुप्तिकालविलसत्तत्त्वात्मचिन्मात्रकं
चैतन्यात्मकमाधिपापरहितं भूम्यादितन्मात्रकम्।
शाम्भव्यादिसमस्तयोगकुलकं सांख्यादितत्त्वात्परं
शब्दावाच्यमहं नमामि सततं चोत्पत्तिनाशात्परम्।।७५।।

ध्याये त्वां नवविद्रुमस्फुटतनुं बर्होल्लसन्मेचकं
नासारञ्जितमौक्तिकं परिलसत्पीताम्बरं कौस्तुभम्।
वेणूकम्बुरथाङ्गपाशपरिघप्रासेक्षुचापाशुगं
श्रीरामं नवमन्मथाधिकमहं **षट्कोणचक्रस्थितम्**।।७६।।

साकेते नगरे समस्तमहिमाधारे जगन्मोहने
रत्नस्तम्भसहस्रमण्टपमहासिंहासने साम्बुजे।
विश्वामित्रवशिष्ठगौतमशुकव्यासादिभिर्मौनिभि-
र्ध्येयं लक्ष्मणलोकपालसहितं सीतासमेतं भजे।।७७।।

In Public domain. Digitization Muthulakshmi Research Academy

एकान्ते कमले जले विकसिते चन्द्राकृतिस्थापिते
स्थाने तारकमण्टपे तनुबिलव्याप्ते सुधामण्डिते।
अब्जार्कानलमण्डलोपरिमहाश्रीषोडशारे सदा
नादान्ते जनकात्मजान्वितमहं रामं भजे तारकम्॥७८॥

साकेते मणिमण्डपे सुरतरुप्रान्तेऽष्टवर्णोल्लस-
त्पत्रे तारककर्णिके प्रविलसत्कल्पप्रसूनाश्चिते।
पद्मे वेदचतुष्कमण्डलसिते नादान्तशय्यातले
तं सेवे ध्रुवमण्डलाब्जविगलत्पीयूषधाराप्लुतम्॥७९॥

ध्याये त्वां रविमण्डलेन्दुधवले पद्मे निषण्णं हरिं
स्वर्णाभं करशङ्खचक्रललितं पीताम्बरं कौस्तुभम्।
स्वर्णश्मश्रुनखालकं ललनया युक्तं किरीटाङ्गदं
हारालङ्कृतवक्षसं पदयुगश्रीपादुकालंकृतम्॥८०॥

वसान्ताक्षराख्ये चतुः पत्रपद्मे
त्रिकोणान्तकण्ठे धरातत्त्वयुक्ते।
वराभीतिपाशाङ्कुशं विद्रुमाभं
गजाश्वे निषण्णं भजे रामचन्द्रम्॥८१॥

बलान्ताक्षरप्रान्तषट्पत्रपद्मे
लसत्तोयतत्त्वे वराभीतिहस्तम्।
महाकुण्डिकां चाक्षमालां वहन्तं
चतुर्वक्त्ररूपं भजे रामचन्द्रम्॥८२॥

डफाक्षान्तराख्ये मणिव्रातपूरे
रथाङ्गाब्जहस्तं महेन्द्रोपलाङ्गम्।
लसद्वह्नितत्त्वे निषण्णं गदाङ्कं
महाविष्णुरूपं भजे रामचन्द्रम्॥८३॥

In Public domain. Digitization Muthulakshmi Research Academy

कठान्ताक्षराख्ये जगत्प्राणतत्त्वे
वराभीतिहस्तं त्रिशूलं दधानम्।
उमानाथमब्जारिखण्डोज्ज्वलाङ्कं
सदर्पाङ्गरूपं भजे रामचन्द्रम्।।८४।।

विशुद्धाख्यपद्मे नभस्तत्त्वरम्ये
अरूपं सुरूपं समस्तस्वरूपम्।
विशिष्टं मनोऽगम्यमेकं अनादिं
भजे जीवजीवात्मरामं च रामम्।।८५।।

द्विपत्राब्जमध्ये मनस्तत्त्वरम्ये
जगत्कारणं ज्योतिरानन्दरूपम्।
लसद्भावविष्णुं मनोभावदीपं
परात्मस्वरूपं भजे रामचन्द्रम्।।८६।।

सदानन्ददेवे सहस्रारपद्मे गलच्चन्द्रपीयूषधाराप्लुतान्ते।
स्थितं राममूर्तिं निषेवे निषेवे न सेवेऽन्यदैवं न सेवे न सेवे।।८७।।

सुधाभासितद्वीपमध्ये विमाने सुपर्वालिवृक्षोज्ज्वले शेषतल्पे।
निषण्णं रमाङ्के निषेवे निषेवे न सेवेऽन्यदैवं न सेवे न सेवे।।८८।।

चिदंशं समानन्दमानन्दकन्दं
सुषुम्नाख्यरन्ध्रान्तराले च हंसम्।
सचक्रं सशङ्खं सपीताम्बराङ्कं
परं चान्यदैवं न जाने न जाने।।८९।।

सुपर्वालिवृक्षोज्ज्वलस्वर्णपीठे
वनौकोमुखैर्मौनिभिस्सेव्यमानम्।
स्थितं पुष्पवृष्ट्यावृतं राममूर्तिं
सदा भूमिजायुक्तमीले हृदन्ते।।९०।।

In Public domain. Digitization: Muthulakshmi Research Academy
करे [illegible] गले तारहार ललाटे ललामम्।
भुजङ्गे निषण्णं परानन्दरूपं सदा भूमिजायुक्तमीले हृदन्ते॥९१॥

चतुर्वेदकूटोल्लसत्कारणाख्यं
स्फुरद्दिव्यवैमानिके भोगितल्पे।
परंधाममूर्तिं निषण्णं निषेवे
निषेवेऽन्यदैवं न सेवे न सेवे॥९२॥

लसद्दिव्यशेषाचले योगपीठे
सदानन्दवैमानिके मा सहायम्।
मुनीनां हृदानन्दमोङ्कारगम्यं
सदा भूमिजायुक्तमीले हृदन्ते॥९३॥

मनस्स्थं मनोऽन्तस्थमाद्यन्तरूपं
महाचिन्त्यवर्ज्यं च मध्यस्थमीशम्।
मनोबुद्ध्यहङ्कारचित्तादिसाक्षिं
परस्वप्रकाशं भजे रामचन्द्रम्॥९४॥

परानन्दवस्तुस्वरूपादिसाक्षिं
परब्रह्मगम्यं परंज्योतिमूर्तिम्।
पराशक्तिमित्रप्रियाराधितांघ्रिं
परंधामरूपं भजे रामचन्द्रम्॥९५॥

परं पवित्रं परवासुदेवं
परात्परं तं परमेश्वराख्यम्।
गुणत्रयाराधितमूलकन्द-
मादित्यवर्णं तमसः परस्तात्॥९६॥

In Public domain Digitization Muthulakshmi Research Academy
(रामं भजे तारकम्)

साकेतेऽगरुगन्धधूपनिबिडे माणिक्यदीपान्विते
कस्तूरीघनसारकुङ्कुमरसप्राचुर्यसर्वोज्ज्वले।
नानापुष्पवितानपङ्क्तिरुचिरे सौवर्णसिंहासने
वासं मन्मथमन्मथं मणिनिभं रामं भजे तारकम्।।९७।।

भङ्गोत्तुङ्गमयामृताब्धिलहरीमध्ये विराड्विग्रहं
द्वीपे निर्जरपादपैः परिवृते कर्पूरदीपोज्ज्वले।
ओङ्कारान्तरमन्दिरे मणिमयेशेषान्तराशायिनं
लक्ष्मीयुक्तमपारचित्सुखपरं रामं भजे तारकम्।।९८।।

वैकुण्ठे नगरे सुरद्रुमतले आनन्दवप्रान्तरे
नानारत्नविनिर्मितस्फुटपटुप्राकारसंवेष्टिते।
सौधेऽब्जोपलशेषतल्पललिते नीलोत्पलाच्छादिते
पर्यङ्के शयनं रमादिसहितं रामं भजे तारकम्।।९९।।

वैकुण्ठे पुटभेदने मणिमयप्रान्तेन्दुसिंहासने
अक्षान्तार्णसरोरुहे शशिगलत्पीयूषवार्यन्तरे।
चन्द्रार्कानलभानुमण्डलयुते शेषाहितल्पान्तरे
वासं वासवनीलकोमलतनुं रामं भजे तारकम्।।१००।।

क्षीराब्धौ शशिशङ्खमौक्तिकलसद्द्वीपे सुधर्मान्तरे
बिन्दौ सार्धकलान्विते परिलसन्नागान्तरे संस्थितम्।
कोटीराङ्गदहारकुण्डलमणिग्रैवेयहारोज्ज्वलं
श्रीवत्साञ्चितमिन्द्रनीलसदृशं रामं भजे तारकम्।।१०१।।

साकेतेऽनलचन्द्रभानुविलसच्चिच्चक्रबिन्दुस्थितं
बालार्कद्युतिभासुरं करतले पाशाङ्कुशौ बिभ्रतम्।
बाणं चापयुतं विशालनयनं स्मेराननाम्भोरुहं
स्त्रीपुंरूपधरं विलाससदनं रामं भजे तारकम्।।१०२।।

In Public domain. Digitization Muthulakshmi Research Academy

अर्धं रक्तपदाब्जमौलिरुचिरं चार्धेन्दुचूडार्चितं
चार्धं रत्नकिरीटकुण्डलधरं ताटङ्कमर्धं धनुः।
शङ्खं चक्रगदाब्जसंयुतकरं श्रेयोमयं वैष्णवं
पाशं चाङ्कुशबाणसंयुतकरं रामं भजे तारकम्।१०३॥

सहस्रपत्राम्बुजकर्णिकान्तर्ज्योतिः प्रकाशं परमादिमूलम्।
तेजोमयं जन्मजराविहीनं श्रीराघवं नित्यमहं नमामि॥१०४॥

(पातु मां रामरत्नम्)

सकलभुवनरत्नं सच्चिदानन्दरत्नं
सकलहृदयरत्नं सूर्यबिम्बान्तरत्नम्।
विमलसुकृतरत्नं वेदवेदान्तरत्नं
पुरहरजपरत्नं पातु मां रामरत्नम्॥१०५॥

इक्ष्वाकुवंशार्णवजातरत्नं
सीताङ्गनायौवनभाग्यरत्नम्।
वैकुण्ठरत्नं मम भाग्यरत्नं
श्रीरामरत्नं शिरसा नमामि॥ १०६॥

निगमशिखररत्नं निर्मलानन्दरत्नं
निरुपमगुणरत्नं नादनादान्तरत्नम्।
दशरथकुलरत्नं द्वादशान्तःस्थरत्नं
पशुपतिजपरत्नं पातु मां रामरत्नम्॥१०७॥

शतमखनुतरत्नं षोडशान्तस्थरत्नं
मुनिजनजपरत्नं मुख्यवैकुण्ठरत्नं
निरुपमगुणरत्नं नीरजान्तःस्थरत्नं
परमपदविरत्नं पातु मां रामरत्नम्॥१०८॥

सकलसुकृतरत्नं सत्यवाक्यार्थरत्नं
शमदमगुणरत्नं शाश्वतानन्दरत्नम्।
प्रणयनिलयरत्नं प्रस्फुटद्द्योतरत्नं
परमपदविरत्नं पातु मां रामरत्नम्॥१०९॥

In Public domain. Digitization Muthulakshmi Research Academy

(पातु मां राममन्त्रम्)

निखिलनिलयमन्त्रं नित्यतत्त्वाख्यमन्त्रं
भवभयहरमन्त्रं भूमिजाप्राणमन्त्रम्।
पवनजनुतमन्त्रं पार्वतीमोक्षमन्त्रं
पशुपतिनिजमन्त्रं पातु मां राममन्त्रम्॥११०॥

प्रणवनिलयमन्त्रं प्राणिनिर्वाणमन्त्रं
प्रकृतिपुरुषमन्त्रं ब्रह्मरुद्रेन्द्रमन्त्रम्।
प्रकटदुरितरागद्वेषनिर्णाशमन्त्रं
रघुपतिनिजमन्त्रं रामरामेति मन्त्रम्॥१११॥

दशरथसुतमन्त्रं दैत्यसंहारमन्त्रं
बिबुधविनुतमन्त्रं मुक्तिमार्गैकमन्त्रम्।
मुनिगणनुतमन्त्रं मुक्तिमार्गैकमन्त्रं
रघुपतिनिजमन्त्रं रामरामेति मन्त्रम्॥११२॥

संसारसागरभयापहविश्वमन्त्रं
साक्षान्मुमुक्षुजनसेवितसिद्धमन्त्रम्।
सारङ्गहस्तमुखहस्तनिवासमन्त्रं
कैवल्यमन्त्रमनिशं भज राममन्त्रम्॥११३॥

जयतु जयतु मन्त्रं जन्मसाफल्यमन्त्रं
जननमरणभेदक्लेशविच्छेदमन्त्रम्।
सकलनिगममन्त्रं सर्वशास्त्रैकमन्त्रं
रघुपतिनिजमन्त्रं राम रामेति मन्त्रम्॥११४॥

अज्ञानसम्भवभवाम्बुधिबाडबाग्नि-
रव्यक्ततत्त्वनिकरप्रणवाधिरूढः।
सीतासमेतमनुजेन हृदन्तराले
प्राणप्रयाणसमये मम सन्निधत्ते॥११५॥

*****

In Public domain. Digitization Muthulakshmi Research Academy

तृतीयाश्वासः

श्रीरामं शिवचापभङ्गनिपुणं सीताङ्गनावल्लभं
सुत्रामार्चितपादपद्मयुगलं सूर्येन्दुनेत्रोज्ज्वलम्।
कर्पूराङ्गविलेपनं घनरुचिं कारुण्यपाथोनिधिं
वन्दे कल्पतरुप्रवेशितलसत्सिंहानाधिष्ठितम्॥१॥

श्रीरामशिशितिकन्धरस्य धनुषस्सङ्क्षेदनप्रापितां
सीतां काञ्चनसन्निभां परिणतामाकल्परत्नोज्ज्वलाम्।
वामाङ्कोपरि लज्जया नतमुखीमालोकयन्नासने
श्रीमद्भानुशशाङ्ककोटिसदृशः पायात्स नो राघवः॥२॥

आरामं वैभवानामभिनवसुपथं हारकेयूरकान्तं
हासोल्लासाभिरामं मणिमयमकुटं मङ्गलानां निवासम्।
मन्दारारामसीमान्तरमणिभवनाधिष्ठितं शिष्टसेव्यं
सल्लापानन्दसिन्धुप्रणयमभिनिशं रामचन्द्रं भजेऽहम्॥३॥

रामं राजशिखामणिं रघुवरं राकेन्दुबिम्बाननं
राजीवायतलोचनं रणहतानेकासुरं राघवम्।
सीताचारुपयोधराञ्चितलसत्काश्मीरगन्धाश्चितं
राजत्कुण्डलमण्डितं शुभकरं रामाभिरामं भजे॥४॥

रामं कोमलनीलमेघविलसद्गात्रं पयोजाननं
काकुत्स्थं दशकण्ठबाहुविदलत्कोदण्डबाणान्वितम्।
पापघ्नं विशदायताक्षियुगलं सौमित्रिसंसेवितं
भक्तानां परमौषधं मुनिवरैस्संस्तूयमानं भजे॥५॥

रामं श्यामलमेघकोमलरुचिं राकेन्दुबिम्बाननं
रक्षोघ्नं रविजार्चितं रघुवरं रत्नोज्ज्वलत्कुण्डलम्।
राजीवाक्षममानुषं रणबलोदग्रं रमानुग्रहं
राजेन्द्रं रमणीयरूपमसकृद्ध्याये जगन्मोहनम्॥६॥

In Public domain. Digitization Muthulakshmi Research Academy

रामं रम्यगुणं रमापतिसमं राकाशशाङ्कानन
राजन्यं रमणीयरूपममलं रामाभिरामं हरिम्।
राजाराधितपादपद्ममनिशं राजन्यसद्भासितं
राकेन्दुप्रतिमं रमाकुचयुगे विन्यस्तहस्तं भजे ।।७।।

रामं कोमलनीलनीरदनिभं नीलालकालङ्कृतं
कट्यां शोभितकिङ्किणीझणझणध्वानैरुपेतं शिशुम्।
कण्ठालम्बितरक्षुनिर्मलनखं कञ्जाक्षमब्जच्छविं
भास्वन्तं मकुटाङ्गदादिविविधाकल्पैस्सदाहं भजे ।।८।।

रामं सीतासमेतं विमलरविशताभासमानं रसार्द्रं
श्यामं देदीप्यमानं स्मितरुचिरमुखं कुण्डलोद्भासिगण्डम्।
श्रीवत्सं श्रीनिवासं सुरतरुविलसद्रत्नसिंहासनस्थं
दिव्याकल्पोज्ज्वलाङ्गं दिविजपतिनुतं सन्ततं तं भजेऽहम् ।।९।।

जलनिधिकृतसेतुं देवतानन्दहेतुं
दशमुखमुखरक्षोदारवैधव्यहेतुम्।
मुनिजननिवहानां मुक्तिसौख्यादिहेतुं
रघुवरकुलकेतुं कीर्तये धर्मसेतुम् ।।१०।।

सकलगुणनिधानं योगिभिस्स्तूयमानं
भजत सुरविमानं रक्षितेन्द्रादिमानम्।
महितवृषभयानं सीतया शोभमानं
स्मरतु हृदयभानुं ब्रह्मरामाभिरामम् ।।११।।

परगुणमणिसिन्धुः मैथिलीप्राणबन्धुः
कनकशिखरिधैर्यस्संश्रिताब्जातसूर्यः।
दशरथनृपसूनुर्देववक्त्राब्जभानु-
र्जयतु भुवनभद्रस्सर्वदा रामभद्रः ।।१२।।

In Public domain. Digitization Muthulakshmi Research Academy

त्रिदशकुमुदचन्द्रो दानवाम्भोजचन्द्रो
दुरिततिमिरचन्द्रो योगिनां ज्ञानचन्द्रः।
प्रणतनयनचन्द्रो मैथिलीनेत्रचन्द्रो
दशमुखरिपुचन्द्रः पातु मां रामचन्द्रः ॥१३॥

स्वयुवतिकुचचन्द्रं बन्धुदुग्धाब्धिचन्द्रं
सुजनकुमुदचन्द्रं वैरिवक्त्राब्जचन्द्रम्।
विकसितमुखचन्द्रं व्याप्तसत्कीर्तिचन्द्रं
सकलभुवनचन्द्रं सन्ततं रामचन्द्रम् ॥१४॥

छेत्तारं दशकण्ठकण्ठकदलीः कन्दर्पदर्पापहं
श्रीकण्ठाकृतिमाप्नुवानममलं घोरासुरप्राणदम्।
बाणं प्रत्युपसंहरन्तमतुलं बाणासनोद्यत्करं
वन्देऽरातिभयावहं मुनिनुतं रामं घनश्यामलम् ॥१५॥

आकर्णान्तगुणोल्लसच्छरमजं कल्पान्तकालोपमं
नेत्रान्तारुणतां वहन्तमनिशं प्रह्लाददं नाकिनाम्।
पौलस्त्यासुरदृष्टिचञ्चलकरं शस्त्रास्त्रसन्धायिनं
बाणानेकविचित्रहस्तकुशलं श्रीवीररामं भजे ॥१६॥

न हि माता न हि तातो न हि मम तनयाश्च नैव सोदर्यः।
इति मम निकटे मृत्यौ रघुपतिरयमेव बन्धुरासन्नः ॥१७॥

देवेन्द्रेण समर्पिते ध्वजयुते तत्स्यन्दने संस्थितं
सोत्कण्ठं सुरवैरिवीर्यविभवं ज्ञात्वा भुजास्फालनम्।
कृत्वा सूतयुतं दशाननहरं तूणीरसंस्थं शरं
हत्वा ज्यानिनदादरातिभयदं श्रीवीररामं भजे ॥१८॥

रुचिरमणिकिरीटं सुन्दरभ्रूललाटं
कनकरुचिरचेलं काशिसद्भोगखेलम्।

In Public domain. Digitization Muthulakshmi Research Academy

विमलजलदनीलं कुण्डलोद्भासिकर्णं
रघुकुलखनिरत्नं सन्ततं चिन्तयामि ॥१९॥

यन्नामैव सहस्रनामसदृशं यन्नाम वेदैस्समं
यन्नामाङ्कितवाक्यमासुरवरस्त्रीगर्भविच्छेदनम् ।
यन्नाम श्वपचार्यभेदरहितं मुक्तिप्रदानोज्ज्वलं
तन्नामालघुरामरामरमणं श्रीरामनामामृतम् ॥२०॥

(सीतासमेतं भजे)

श्रीवत्साङ्कमुदारकौस्तुभलसत्पीताम्बरालङ्कृतं
नानारत्नविराजमानमकुटं नीलाम्बुदश्यामलम् ।
कस्तूरीघनसारचर्चिततनुं मन्दारमालाधरं
कन्दर्पायुतसुन्दरं रघुपतिं सीतासमेतं भजे ॥२१॥

रामं राक्षसमर्दनं रघुवरं दैतेयविध्वंसिनं
सुग्रीवेप्सितराज्यदं सुरपतेर्भीत्यन्तकं शार्ङ्गिणम् ।
भक्तानामभयप्रदं भयहरं पापौघविध्वंसकं
सामीरिस्तुतपादपद्मयुगलं सीतासमेतं भजे ॥२२॥

रामं रक्तसरोरुहाक्षममलं लङ्काधिनाथान्तकं
कौसल्यानयनोत्सवं रघुवरं नागेन्द्रतल्पस्थितम् ।
वैदेहीकुचकुम्भकुङ्कुमरजोलङ्कारहारं हरिं
मायामानुषविग्रहं रघुपतिं सीतासमेतं भजे ॥२३॥

रामं हेमतटित्प्रभांशुकधरं वीरासने संस्थितं
बालं नीलमणिप्रभं मधुरिपुं दैत्येन्द्रगर्वापहम् ।
विश्वामित्रवसिष्ठवानरवरैस्संसेव्यमानं सदा
नित्यं भास्करचन्द्रकोटिसदृशं सीतासमेतं भजे ॥२४॥

In Public domain. Digitization Muthulakshmi Research Academy

शत्रुघ्नो व्यजनाश्रितोऽपि भरतः पार्श्वद्वये पश्चिमे
छत्रं चामरसंयुतं कलितवान् यं सेवते लक्ष्मणः।
मूले कल्पतरोर्विमानविलसन्माणिक्यसिंहासने
पद्मास्यं मुनिसेवितं रघुपतिं सीतासमेतं भजे ॥२५॥

कस्तूरीतिलकं कपीन्द्रहरणं कारुण्यवारां निधिं
क्षीराम्भोधिसुतामुखाब्जमधुपं कल्याणसम्पन्निधिम्।
कौसल्यानयनोत्सवं कपिवरत्राणं महापौरुषं
कौमारप्रियमर्ककोटिसदृशं सीतासमेतं भजे ॥२६॥

विद्युत्कोटिदिवाकरद्युतिनिभं श्रीकौस्तुभालङ्कृतं
योगीन्द्रैस्सनकादिभिःपरिवृतं कैलासनाथप्रियम्।
मुक्तारत्नकिरीटकुण्डलधरं ग्रैवेयहारान्वितं
वैदेहीकुचसन्निवासमनिशं सीतासमेतं भजे ॥२७॥
विद्युत्कोटिसहस्रभानुसदृशं सिंहासने संस्थितं
मूले कल्पतरोर्महामणिमये भान्तं परेशं विभुम्।
सुग्रीवाङ्गदजाम्बवादिहरिभिस्संसेव्यमानं हरिं
शम्भुब्रह्मसुरादिभिः परिवृतं सीतासमेतं भजे ॥२८॥

मेघश्यामलमम्बुजातनयनं विस्तीर्णवक्षस्स्थलं
बाहुद्वन्द्वविराजितं सुवदनं शोणाङ्घ्रिपङ्केरुहम्।
नानारत्नविचित्रभूषणयुतं कोदण्डबाणाश्रितं
त्रैलोक्याप्रतिमानसुन्दरतनुं सीतासमेतं भजे ॥२९॥

दिव्यारण्ययतीन्द्रनामनगरे मध्ये महामण्टपे
स्वर्णस्तंभसहस्रषोडशयुते मन्दारमूलश्रिते।
नानारत्नविचित्रनिर्मलमहासिंहासने संस्थितं
सीतालक्ष्मणसेवितं रघुपतिं सीतासमेतं भजे ॥३०॥

In Public domain. Digitization Muthulakshmi Research Academy

यत्पादाम्बुजसंभवा त्रिपथगा भागीरथी मुक्तिदा
लोकानां हतकिल्बिषा भगवती मन्दाकिनी शाम्भवी।
लोके भाति सरस्वती सुरनदी पुण्येन्दुकान्तिप्रभा
तं विष्णुं भरताग्रजं रघुवरं सीतासमेतं भजे ॥३१॥

यत्पादाम्बुजरेणुना मुनिसती मुक्तिं गता यन्महः
पुण्यं पातकनाशनं त्रिजगतां भाति स्मृतं पावनम्।
स्मृत्वा राघवमप्रमेयममलं पूर्णेन्दुमन्दस्मितं
तं रामं सरसीरुहाक्षमतुलं सीतासमेतं भजे ॥३२॥

वैदेहीकुचमण्डलाग्रविलसन्माणिक्यहस्ताम्बुजं
चञ्चत्कङ्कणहारनूपुरलसत्केयूरहारान्वितम्।
दिव्यश्रीमणिकुण्डलोज्ज्वलमहाभूषासहस्रान्वितं
वीरश्रीरघुपुङ्गवं गुणनिधिं सीतासमेतं भजे ॥३३॥
वैदेहीकुचमण्डलोपरि लसन्माणिक्यहारावली-
मध्यस्थं नवनीतकोमलरुचिं नीलोत्पलश्यामलम्।
कन्दर्पायुतकोटिसुन्दरतनुं पूर्णेन्दुबिम्बाननं
कौसल्याकुलभूषणं रघुपतिं सीतासमेतं भजे ॥३४॥

वैदेहीयुतवामभागमतुलं वन्दारुमन्दारकं
वन्दिप्रस्तुतकीर्तिवासिततरुच्छायानुकारिप्रभम्।
वैदेहीकुचकुङ्कुमाङ्कितमहोरस्कं महाभूषणं
वेदान्तैरुपगीयमानमसकृत्सीतासमेतं भजे ॥३५॥

साकेते मणिनिर्मिते प्रविलसत्सौधायुतैरावृते
अन्तर्गेहमनीतभानुनिलये चञ्चत्पताकोज्ज्वले।
हर्म्ये भर्ममये घनाघनरवैर्घण्टाशतैर्नादिते
डोलातल्पविहारिणं रघुपतिं सीतासमेतं भजे ॥३६॥

In Public domain. Digitization Muthulakshmi Research Academy

साकेते मणिकोटिभिस्सुखचिते दिव्याम्बरालङ्कृते
हेमस्तम्भसहस्रकोटिघटिते तारापथात्युन्नते।
रम्ये स्वर्णमये विचित्रभवने दीव्यन्तमक्षैर्मुदा
रामं स्मेरमुखाम्बुजं रघुपतिं सीतासमेतं भजे।।३७।।

साकेते जननीकरार्पितलसत्कस्तूरिकासुन्दरे
फाले मौक्तिकजालकं शशिनिभं स्वर्णाङ्कितं वर्तुलम्।
चूडालम्बिमनोज्ञहारकलितं बिभ्राणमत्युज्ज्वलं
रामं कोसलपुत्रिकावरसुतं सीतासमेतं भजे।।३८।।

साकेते सरयूजलेऽतिविमले प्रोत्फुल्लपद्माञ्चिते
दिव्यस्त्रीशतकोटिनृत्यरुचिरे स्वर्गापगासुन्दरे।
पश्यन्तीषु सुराङ्गनासु शपथं क्रीडन्तमुर्वीसुता-
बाहुभ्यां विमलोदकेन रुचिरं सीतासमेतं भजे।।३९।।
वैदेहीस्तनकुम्भसम्भ्रमपरीरम्भादृतं सिन्धुगं
राकाचन्द्रनिभाननं रघुवरं राजीवपत्रेक्षणम्।
प्रावृण्मेघनिभद्युतिं स्मितयुतं हारावलीभूषितं
श्रीरामं प्रणमामि भक्तजनताचिन्तामणिं सन्ततम्।।४०।।

(श्रीरामचन्द्रं भजे)

वामाङ्कोपरि तप्तकाञ्चननिभां सीतां समालोकिनं
हस्ताभ्यां धृतछत्रचामरमहासौमित्रिणा सेवितम्।
नित्यं पूजितपादपद्मयुगलं देवैस्सुरेन्द्रादिभि
स्सेव्यं मानुषराक्षसैः कपिवरैः श्रीरामचन्द्रं भजे।।४१।।
श्रीरामं भुवनैकसुन्दरतनुं धाराधरश्यामलं
राजीवायतलोचनं रघुवरं राकेन्दुबिम्बाननम्।
कोदण्डादिनिजायुधाश्रितभुजैर्भान्तं विदेहात्मजा-
धीशं भक्तजनावनं रघुवरं श्रीरामचन्द्रं भजे।।४२।।

In Public domain. Digitization Muthulakshmi Research Academy

रामं कौशिकगीतिमाप्रियकरं सीतापतिं सानुजं
रक्षोघ्नं वनवासितं गुणनिधिं विघ्नघ्नमाप्तार्कजम्।
सेतोर्बन्धनधीरवानरबलं धिक्कुम्भकर्णेन्द्रजित्
पङ्क्तिग्रीवमवद्विभीषणमजं श्रीरामचन्द्रं भजे।।४३।।

वैदेहीरमणं हिरण्यतिलकं विश्वम्भरापालकं
वर्धिष्णुं विविधायुधेषु निपुणं विद्वज्जनश्रीकरम्।
विद्यावासगृहं वियच्चरनुतं विद्युत्प्रकाशाम्बरं
विप्रत्राणविधेयमादिपुरुषं श्रीरामचन्द्रं भजे।।४४।।

वैदेहीवशवर्तिनं रणजितं रत्नाकरागारिणं
पङ्क्तिग्रीवमदापहं पटुभुजं पद्माप्तकोटिप्रभम्।
विष्णुं जिष्णुमवार्यशौर्यनिलयं नीलाम्बुदश्यामलं
रत्नालङ्करणान्वितं रघुपतिं श्रीरामचन्द्रं भजे ।। ४५।।

वैदेह्या सममेत्य राज्यमनिशं सौवर्णसिंहासने
मन्दारद्रुमवाटिकान्तरमहाश्रीचन्द्रकान्तालये।
कैकेयीतनयाञ्जनातनयसत्सौमित्रिसंसेवितं
मेघश्याममुदारहासवदनं श्रीरामचन्द्रं भजे।।४६।।

वैदेहीरमणीयवक्त्रवनजप्रद्योतखद्योतनं
केलीसद्मनि रत्नदीपकलिकाकान्ते वसन्तं हरिम्।
सौरभ्यप्रसवप्रयुक्तविलसच्छय्यान्तरे शायिनं
श्रीमन्तं रघुवंशदीपकमणिं श्रीरामचन्द्रं भजे।।४७।।

श्रीरामं नवरत्नकुण्डलधरं श्रीरामरक्षामणिं
श्रीरामं च सहस्रभानुसदृशं श्रीरामचन्द्रोदयम्।
श्रीरामं श्रुतकीर्तिमाकरमहं श्रीराममुक्तिप्रदं
श्रीरामं रघुनन्दनं भयहरं श्रीरामचन्द्रं भजे।।४८।।

In Public domain. Digitization Muthulakshmi Research Academy

देवानां हितकारणेन भुवने धृत्वावतारं ध्रुवं
रामं कौशिकयज्ञविघ्नदलनं तत्ताटकासंहरम्।
नित्यं गौतमदारशापदलनश्रीपादरेणुं शुभं
शम्भोरुत्कटचापखण्डनमहासत्त्वं भजे राघवम्।। ४९।।

राजीवनेत्र रघुपुङ्गव रामभद्र
राकेन्दुबिम्बसदृशानन नीलगात्र।
रामाभिराम रघुवंशसमुद्भव त्वं
श्रीरामचन्द्र! मम देहि करावलम्बम्।। ५०।।

मुकुररुचिरगण्डं पुण्डरीकाभतुण्डं
करिकरभुजदण्डं रौद्रतेजोऽग्निकुण्डम्।
नमितभुवनषण्डं भेदितोग्रारिमण्डं
गुणनिकरकरण्डं नौमि रामं प्रचण्डम्।। ५१ ।।

कोदण्डदण्डविनिवेशितबाहुदण्ड-
माखण्डलाद्यमरवर्षितपुष्पवर्षम्।
आयोधनस्थितरजः परिदूसराङ्ग-
मत्यूर्जितं रघुवरेन्द्रमरिप्रभेदम्।।५२।।

सेव्यं श्रीराममन्त्रं श्रवणशुभकरं श्रेष्ठसुज्ञानिमन्त्रं
स्तव्यं श्रीराममन्त्रं नरकदुरितदुर्वारनिर्घातमन्त्रम्।
भव्यं श्रीराममन्त्रं भजत भजत संसारविस्तारमन्त्रं
दिव्यं श्रीराममन्त्रं दिवि भुवि विलसन्मोक्षरक्षैकमन्त्रम्।।५३।।

आजानुबाहुमरविन्ददृशं शुभाङ्गं
राजाधिराजमघराजितमः पतङ्गम्।
श्रीजानकीमुखसरोरुहमत्तभृङ्गं
श्रीनायकं हृदि भजामि कृपातरङ्गम्।।५४।।

In Public domain. Digitization Muthulakshmi Research Academy

एकेन बाणमपरेण करेण चापं
हर्षाद्वहन्तमसमानजटाशिरस्कम्।
सीतासहायमनुजेन समं चरन्तं
श्रीरामचन्द्रमनिशं कलयामि चित्ते।। ५५।।

आमीलयन् दशशिरोवदनाम्बुजात-
मुन्मीलयन् जनकजानयनोत्पले च।
आनन्दयन् सकलजीवचकोरराशिं
श्रीरामचन्द्रविभुरस्तु मदीयचित्ते।।५६।।

रामं पुराणपुरुषं रमणीयवेषं
राजाधिराजमकुटार्चितपादपीठम्।
सीतापतिं सुनयनं जगदेकवीरं
श्रीरामचन्द्रमनिशं कलयामि चित्ते।।५७।।

(रामं भजे राघवरामचन्द्रम्)

सिंहासनस्थं सुरसेवितव्यं रत्नाङ्कितालंकृतपादपद्मम्।
सीतासमेतं शशिसूरनेत्रं रामं भजे राघवरामचन्द्रम्।।५८।।

सुग्रीवमित्रं सुजनानुरूपं लङ्काहरं राक्षसवंशनाशम्।
वेदाश्रयाङ्गं विपुलायताक्षं रामं भजे राघवरामचन्द्रम्।।५९।।

अनन्तकीर्तिं वरदं प्रसन्नं पद्मासनं सेवकपारिजातम्।
राजाधिराजं रघुवीरकेतुं रामं भजे राघवरामचन्द्रम्।।६०।।

पद्मासनस्थं सुरसेवितव्यं पद्मालयानन्दकटाक्षवीक्ष्यम्।
गन्धर्वविद्याधरगीयमानं रामं भजे राघवरामचन्द्रम्।।६१।।

अचिन्त्यमव्यक्तमनन्तरूपमद्वैतमानन्दमनादिगम्यम्।
पुण्यस्वरूपं पुरुषोत्तमाख्यं रामं भजे राघवरामचन्द्रम्।।६२।।

In Public domain. Digitization Muthulakshmi Research Academy

मन्दस्मितं कुण्डलिगण्डभागं पीताम्बरं भूषणभूषिताङ्गम्।
नीलोत्पलाङ्गं भुवनैकमित्रं रामं भजे राघवरामचन्द्रम्॥६३॥

डिण्डीरहासमणिकुण्डलचारुकर्ण-
दोर्दण्डशौर्यजितभण्डनमेरुधीर।
कोदण्डकाण्डपरिमण्डितपार्थिवेन्द्र
वेदण्डयान जय राघव रामचन्द्र॥६४॥

लोकान् सप्त निनादयन्हरिहयस्यान्तर्भयं वर्धयन्
सप्तानां च भुवां प्रकम्पमुदयन् सप्तार्णवान् घूर्णयन्।
उन्मीलानि रसातलानि जनयन् सप्तापि पृथ्वीधरान्
सुश्रीराघवबाहुदण्डविदलत्कोदण्डचण्डध्वनिः॥६५॥

ब्रह्माण्डं दलयन् वियद्विदलयन् भोगीशभोगस्थले
सन्त्रासं जनयन् समुद्रपटलीतोयं समुद्वेलयन्।
दिक्पालानपि क्षोभयन् कुलगिरीन् दीर्णत्वमापादयन्
नक्षत्राणि च पातयन्विलसितश्शौरेर्धनुर्ज्यारवः॥६६॥

यश्चण्डगाम्भीर्यधनुर्विजेता भूमण्डलीपुण्यकृतावतारः।
आखण्डलाद्यैरमरैरुपेतः कोदण्डपाणिः कुलदैवतं नः॥६७॥

वैदेहीपुलकाङ्कुरार्चिततनुर्व्यालम्बिहस्ताम्बुजो
हस्ते मोदितरत्नकङ्कणरवःकल्पद्रुमाणां वने।
पादाभ्यां मणिपादुकाद्युतिकरप्रेङ्खन्नखाभ्यां चर-
न्निष्टालापसुधारसं दिशतु मे श्रीरामचन्द्रो हरिः॥६८॥

वामाङ्कस्थितजानकीकुचयुगे विन्यस्तहस्ताम्बुजं
प्रोज्जृम्भाननपङ्कजोपरिलसद्विस्पष्टबिम्बाधरम्।
सत्तारेण विशिष्टकङ्कणरवेणोङ्कारसिंहासने
भान्तं शारदचन्द्रहासमनिशं वन्दे सदा राघवम्॥६९॥

In Public domain. Digitization Muthulakshmi Research Academy

वैदेहीसहितं च लक्ष्मणयुतं कैकेयिपुत्त्रान्वितं
सुग्रीवं च विभीषणानिलसुतौ नीलं नलं चाङ्गदम्।
विश्वामित्रवशिष्ठगौतमभरद्वाजादिकान् मानयन्
रामो मारुतिसेवितः स्मरतु मां साम्राज्यसिंहासने॥७०॥

रामः प्राञ्जलिमग्रतोऽनिलसुतं सौहार्दमादर्शयन्
प्राञ्चच्चामरयुग्मभासितकरान् पश्चात् स्थले पार्श्वयोः।
वामाङ्केऽवनिजां विभीषणमुखान् सम्भावयन् बोधयन्
धीमुद्राकरतत्त्वरूपमवतात्साम्राज्यसिंहासने॥७१॥

पौगण्डे हितबालकैः परिवृतः पूर्णेन्दुकान्ताननः
प्रीत्या बद्धविचित्रहेमवसने संसक्तकाञ्चीगुणः।
आजानुप्रविलम्बिबाहुयुगलश्श्यामाम्बुभृद्विग्रहो
भ्रातृस्वानुचरश्चराचरगुरुः पायात्सदा राघवः॥७२॥

रामो बद्धपयोनिधिर्गुणनिधिर्गत्वा समं वानरै-
र्लङ्कां प्राप्य सकुम्भकर्णदनुजं हत्वा रणे रावणम्।
तत्र स्थाप्य विभीषणं रिपुपुरे सीतापतिः पुष्पकं
चारूढः पुनरागतस्सभृतवान् धात्रीमजः पातु नः॥७३॥

रत्नोल्लसज्ज्वलितकुण्डलगण्डभागं
कस्तूरिकातिलकशोभितफालभागम्।
कर्णान्तदीर्घनयनं करुणाकटाक्षं
श्रीरामचन्द्रमुखमात्मनि सन्निधत्ताम्॥७४॥

हेलाभग्नशशाङ्कशेखरधनुर्भूमण्डलाखण्डल-
श्रेणीमौलिलसद्विनूत्नमणिभिर्दीप्ताङ्घ्रिपङ्केरुहः।
कल्याणं जनयत्वखण्डविभवः कल्याणलीलोत्सवे
मार्तण्डान्वयमण्डनश्च भवतां रामस्सरामस्सदा॥७५॥

In Public domain. Digitization Muthulakshmi Research Academy

विद्युत् स्फुरन्मकरकुण्डलदीप्तचारु-
गण्डस्थलं मणिकिरीटविराजमानम्।
पीताम्बरं जलदनीलमुदारकान्तिं
श्रीरामचन्द्रमनिशं कलयामि चित्ते।।७६।।

करतलधृतचापं कालमेघस्वरूपं
सरसिजदलनेत्रं चारुहासं सुगात्रम्।
विचितवननिवासं विक्रमोदग्रवेषं
प्रणमत रघुनाथं जानकीप्राणनाथम्।।७७।।

यः पृथ्वीभरवारणाय दिविजैस्सम्प्रार्थितश्चिन्मय
स्सञ्जातः पृथिवीतले रविकुले मायामनुष्योऽव्ययः।
निश्चक्रं हतराक्षसः पुनरगाद्ब्रह्मत्वमाद्यं स्थिरां
कीर्तिं पापहरां विधाय जगतां तं जानकीशं भजे।।७८।।

विश्वोद्भवस्थितिलयादिषु हेतुमेकं
मायाश्रयं विगतमायमचिन्त्यमूर्तिम्।
आनन्दसान्द्रममलं निजबोधरूपं
सीतापतिं विदिततत्त्वमहं नमामि।।७९।।

रामचन्द्रचरणारविन्दयोरन्तरङ्गचरभृङ्गलीलया।
तत्र सन्ति च रसाश्चतुर्विधा माकरन्द रस एव पङ्कजे।।८०।।

रामः पातु सदैव मामरिभयाद्रामं सदा भावये
रामेणैव हृतं महत्तरतमो रामाय नित्यं नमः।
रामान्नास्ति परं पदं सुललितौ रामस्य पादौ भजे
रामें प्रीतिरचञ्चलास्तु मम हे श्रीराम मां पालय ।।८१।।

राममिन्दीवरश्यामं राजीवायतलोचनम्।
ज्याघोषनिर्जितारातिं जानकीरमणं भजे।।८२।।

In Public domain. Digitization Muthulakshmi Research Academy

(पातु मां वीररामः)

नानादिव्यास्त्रतेजः स्फुरदमितभुजश्शत्रुसंहारधीरः
कौटिल्योद्द्योतमानभ्रुकुटियुतमुखं धारयन्नम्बुदाभः।
तूणीरप्रोत्थवेगोल्लसितशरवरैस्ताडयित्वा दशास्यं
वीरश्रीबन्धुराङ्गस्त्रिदशपतिनुतः पातु मां वीररामः ॥८३॥

हत्वा युद्धे दशास्यं त्रिभुवनविषमं वामहस्तेन चापं
भूमावारोप्य तिष्ठन्नितरकरधृतं भ्रामयन् बाणमेकं
आरक्तोपान्तनेत्रश्शरदलितवपुः कोटिसूर्यप्रकाशो
वीरश्रीबन्धुराङ्गस्त्रिदशपतिनुतः पातु मां वीररामः ॥८४॥

युद्धे सन्नद्धशस्त्रं कपिवरभयदं कुम्भकर्णं सुरारिं
बाणेनैकेन सद्यः प्रकटितहुतभुग्विश्वरोषारुणाक्षम्।
हत्वा कृत्वा प्रमोदं सुरकपिशततेर्मौनिबृन्दैकसेव्यो
वीरश्रीबन्धुराङ्गस्त्रिदशपतिनुतः पातुमां वीररामः ॥८५॥

दैतेयोदग्रसेव्यं पटुतरविशिखं रावणं घोरनाथं
देवेन्द्रस्तूयमानस्फुरदरिनिकरानन्धकारांश्च हत्वा।
दिक्पालान् प्राप्तभोगान्मणिरुचिसुभगान् दिक्षुतान् स्थापयित्वा
वीरश्रीबन्धुराङ्गस्त्रिदशपतितनुः पातु मां वीररामः ॥८६॥
कौसल्यावीरगर्भाम्बुधिघनविलसत्पूर्णचन्द्रप्रकाशो
मौनीन्द्रस्वान्तपद्मप्रविमलतरणिर्धर्मनैपुण्यरूढः।
मारीचं राक्षसेन्द्रं निजशरदहनायाहुतिं कल्पयित्वा
वीरश्रीबन्धुराङ्गस्त्रिदशपतिनुतः पातु मां वीररामः ॥८७॥

यो दण्डकारण्यनिशाचरेन्द्रान् कोदण्डलीलाविषयांश्चकार।
वेदण्डशुण्डायितबाहुदण्डः कोदण्डपाणिः कुलदैवतं नः ॥८८॥

In Public domain. Digitization Muthulakshmi Research Academy

तरुणौ रूपसम्पन्नौ सुकुमारौ महाबलौ
पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ।
फलमूलाशिनौ दान्तौ तापसौ धर्मचारिणौ
रक्षःकुलनिहन्तारौ भ्रातरौ रामलक्ष्मणौ ॥८९॥

कल्याणानां निधानं कलिमलमथनं पावनं पावनानां
पाथेयं यन्मुमुक्षोस्सपदि परपदप्राप्तये प्रस्थितस्य।
विश्रामस्थानमेकं कविवरवचसां जीवनं सज्जनानां
बीजं धर्मद्रुमस्य प्रभवतु भवतां भूतये रामनाम ॥९०॥

कौसल्यानयनेन्दुं दशरथवदनारविन्दमार्तण्डम्।
सीतामानसहंसं रामं राजीवलोचनं वन्दे ॥९१॥

दीर्घबाहुमरविन्दलोचनं दीनवत्सलमनाथरक्षणम्
दीक्षितं सकललोकरक्षणे दैवतं दशरथात्मजं भजे ॥९२॥

सत्येन लोकान् जयति दीनान् दानेन राघवः।
गुरून् शुश्रूषया वीरो धनुषा युद्धशात्रवान् ॥९३॥

भर्जनं भवबीजानामार्जनं सुखसम्पदाम्।
तर्जनं यमदूतानां रामरामेति कीर्तनम् ॥९४॥

सकृत्प्रणतरक्षायां साक्षी यस्य विभीषणः।
सापराधप्रतीकारस्स श्रीरामो गतिर्मम ॥९५॥
न जाने जानकीजाने राम त्वन्नामवैभवम्।
सर्वज्ञो भगवान् शम्भुर्वाल्मीकिर्वेत्ति वा न वा ॥९६॥

कृत्याकृत्यविवेकहीनमनसां हत्यादिभिर्जीविना-
मत्यन्तं लघुतारकं तनुभृतामत्यन्तशोकापहम्।
सत्यानन्दमयं समस्तनिगमस्तुत्यं पदं सम्पदां
स्थानं श्रीरघुरामनामविमलं नित्यं स्मरन् मुच्यते ॥९७॥

In Public domain. Digitization Muthulakshmi Research Academy

साकेते स्वनिकेतने सुरतरोर्मूले लसद्वेदिके
पद्मं रत्नमयं दधानमपरं हस्ताम्बुजं जानुनि।
सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं
पश्यन्तं परिपूर्णचन्द्रवदनं भास्वत्किरीटं भजे॥९८॥

विद्युद्वर्णोपमाङ्गीं विकचवरमुखीं विद्रुमाभाधरोष्ठीं
वेदण्डौद्धत्यकुम्भप्रतिकुचयुगलां वेदिमध्यावलग्नाम्।
श्यामां सम्फुल्लपद्मच्छदनिभनयनां चारुहासां सुनासां
सीतां श्रीरामदेवीं श्रितजनवरदां चिन्तयेऽनन्तमूर्तिम्॥९९॥

माणिक्यमञ्जीरपदारविन्दां रामार्कसम्फुल्लमुखारविन्दाम्।
भक्ताभयप्रापिकरारविन्दां देवीं भजे राघववल्लभां ताम्॥१००॥

जयतु विजयकारी जानकीमोदकारी
तपनकुलविहारी दण्डकारण्यचारी
दशवदनकुठारी दैत्यविच्छेदकारी
मणिमकुटकधारी चण्डकोदण्डधारी॥१०१॥

चेतः स्थितं चिन्तक चिन्तनीयं चिन्ताहरं चिन्तितपारिजातम्।
अचिन्तनीयं बहुचिन्तयेऽहं तमेव रामं भुवनाभिरामम्॥१०२॥

साकेते शरदिन्दुकुन्दधवले सौधे महामण्डपे
पर्यस्तागरुधूपधूमपटले कर्पूरदीपोज्ज्वले।
सुग्रीवाङ्गदवायुपुत्रसहितं सौमित्रिणा सेवितं
लीलामानुषविग्रहं रघुपतिं रामं भजे श्यामलम्॥१०३॥

रामः पिता राघव एव माता रामो सुबन्धुश्च सखा हितश्च।
रामो गुरुर्मे परमं च दैवं रामं विना नान्यमहं स्मरामि॥१०४॥

In Public domain. Digitization Muthulakshmi Research Academy

या कृपा मुनिसन्त्राणे या कृपा कपिनायके।
या विभीषणरक्षायां सा राम मयि धीयताम् ॥१०५॥

दयानिधे राघव रामचन्द्र
निरस्य पापानि ममाखिलानि।
त्वय्येव भक्तिं सुदृढां प्रयच्छ
सैव प्रसूते ह्यखिलानभीष्टान् ॥१०६॥

अक्षीणबाणतूणीरस्समारोपितकार्मुकः।
दशग्रीवशिरोहन्ता श्रीरामश्शरणं मम ॥१०७॥

श्रीराम मे त्वं हि पिता च माता
श्रीराम मे त्वं हि सुहृच्च बन्धुः।
श्रीराम मे त्वं हि गुरुश्च गोष्ठी
श्रीराम मे त्वं हि समस्तमेव ॥१०८॥

पटुतरजलवाहध्वानमादाय चापं
पवनजवनमेकं बाणमाकृष्य तूणात् ।
अभयवचनदायी सानुजस्सर्वतो मे
रणहतदनुजेन्द्रो रामचन्द्रस्सहायः ॥१०९॥

कौसल्यालसदालवालजनितस्सीतालतालिङ्गित-
स्सिक्तः पङ्क्तिरथेन सोदरमहाशाखाभिरत्युन्नतः।
रक्तस्तीक्ष्णनिदाघपाटनपटुच्छायाभिरानन्दय
न्नस्मद्वाञ्छितसत्फलानि फलतु श्रीरामकल्पद्रुमः ॥११०॥

निगमशिखररत्नं नित्यमाशास्यरत्नं
जननुतनृपरत्नं जानकीरूपरत्नम्।
भुवनवलयरत्नं भूभुजामेकरत्नं
रघुकुलवररत्नं पातु मां राम रत्नम् ॥१११॥

In Public domain. Digitization Muthulakshmi Research Academy

विशालनेत्रं परिपूर्णगात्रं सीताकलत्रं सुरवैरिजैत्रं।
कारुण्यपात्रं जगतः पवित्रं श्रीरामरत्नं प्रणतोऽस्मि नित्यम्॥११२॥

श्रीरामचन्द्रश्श्रितपारिजातस्समस्तकल्यणगुणाभिरामः।
सीतामुखाम्भोरुहचञ्चरीको निरन्तरं मङ्गलमातनोतु॥११३॥

इन्दीवरदलश्यामः पुण्डरीकनिभेक्षणः।
धृतकोदण्डतूणीरो राम एव गतिर्मम॥११४॥

इच्छामो हि महाबाहुं रघुवीरं महाबलम्।
गजेन महताऽयान्तं रामं छत्रावृताननम्॥११५॥

रामो नाम बभूव हुं तदबला सीतेति हुं तौ पितु-
र्वाचा पञ्चवटीवने विंहरतस्तामाहरद्रावणः।
निद्रार्थं जननीकथामिति हरेर्हुङ्कारतश्शृण्वत
स्सौमित्रे! क्व धनुर्धनुरिति व्यागा्रा गिरः पान्तु नः॥११६॥

श्रीराघवेति वरदेति दयापरेति
भक्तप्रियेति भवबन्धनमोचनेति।
नाथेति नागशयनेति सदा स्तुवन्तं
मां पाहि भीतमनिशं कृपणं कृपालो!॥११७॥

रामचन्द्रसरितामृतपानं सोमपानशतकोटिसमानम्।
सोमपानशतकोटिभिरीयाज्जन्मनैति रघुनायकनाम्ना॥११८॥

राम राम दयासिन्धो रावणारे जगत्पते।
त्वत्पादकमलासक्तिर्भवेज्जन्मनि जन्मनि॥११९॥

श्रीराघवं रामचन्द्रं रावणरिं रमापतिम्।
राजीवलोचनं रामं तं वन्दे रघुनायकम्॥१२०॥

In Public domain. Digitization Muthulakshmi Research Academy

यत्पादपङ्कजरजश्श्रुतिभिर्विमृग्यं
यन्नाभिपङ्कजभवः कमलासनश्च।
यन्नामसाररसिको भगवान् पुरारि-
स्तं रामचन्द्रमनिशं हृदि भावयामि॥१२१॥

यस्यावतारचरितानि विरिञ्चिलोके
गायन्ति नारदमुखा भवपद्मजाद्याः।
आनन्दजाश्रुपरिषिक्तकुचाग्रसीमा
वागीश्वरी च तमहं शरणं प्रपद्ये॥१२२॥

जातिभ्रष्टोऽतिपापी परधनपरदारेषु नित्योद्यतो वा
स्तेयी ब्रह्मघ्नमातापितृवधनिरतो योगिबृन्दापकारी।
ध्येयं कर्णामृतं यःपठति हि सततं रामचन्द्रस्य भक्तो
योगीन्द्रैरप्यलभ्यं पदमपि लभते सर्वदेवैश्च सेव्यम्॥१२३॥

*****

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्थाश्वासः

श्रीरामं जनकात्मजाकुचतटीश्रीगन्धपङ्कोल्लस-
द्वक्षोवीथिमुदारमाश्रितमुनिप्रादुर्भवत्कल्पकम्।
ब्रह्मेशानमुखामरस्तुतमजं ब्रह्माण्डभाण्डाधिपं
वन्दे कोसलकन्यकासुतमहं वाराशिगर्वापहम्॥१॥

साकेते सौधबद्धध्वजशतमहिते राजमार्गे विशाले
घण्टारावैरुपेते कनककुथयुते गन्धनागे वसन्तम्।
दिव्याकल्पोज्ज्वलाङ्गं रथगजतुरगैरावृतं सुप्रसन्नं
रामं श्वेतातपत्रावृतमुखकमलं चिन्तयाम्यन्तरङ्गे॥२॥

साकेते मणितोरणाञ्चितलसद्वीथीशते प्राङ्गणे
सानन्दं भरतादिभिस्सहचरैरत्यन्तमोदाकरैः।
क्रीडन्तं मणिकन्दुकैः करगतैरन्योन्यमत्युज्ज्वलैः
पौरस्त्रीनयनोत्सवैः प्रतिदिनं पूज्यं भजे राघवम्॥३॥

साकेते कनकाद्रिशृङ्गसदृशे कल्पद्रुमैरावृते
वैदूर्यादिमणीन्द्रकान्तिघटिते देवन्द्रनीलोज्ज्वले
कुर्वन्तं मणिभूषणे मणिगृहे माणिक्यपीठे भजे
पुत्त्रौ मन्मथसुन्दरौ कुशलवौ संसेव्यपादौ जनैः॥४॥

कदा सुरतरुस्थले कनकमण्टपे पुष्पके
वरासनमुपेयुषी वसुदलारविन्दोज्ज्वले।
करेण हृदयस्पृशा कलितमुद्रचिन्मुद्रिका
मम स्फुरतु वासना मनसि बद्धवीरासना॥५॥

नदीरमणबन्धनं मतिमतामुदारं धनं
जगत्सततनन्दनं सकलकामनिष्यन्दनम्।
विलिप्तहरिचन्दनं विनुतया तु संक्रन्दनं
भजामि रघुनन्दनं पवननन्दनस्यन्दनम्॥६॥

In Public domain. Digitization Muthulakshmi Research Academy

रक्ताम्भोरुहलोचनं कुवलयश्यामं कपोले धनुः-
कोटिन्यस्तकराम्बुजं धृततनुत्राणं जटामण्डितम्।
जेतारं खरदूषणत्रिशिरसामाबद्धगोधाङ्गुलि-
त्राणं मार्गणपूर्णतूणयुगलं कोदण्डरामं भजे ॥७॥

श्रीमत्कल्पद्रुमूले सकलमणिमये मण्डपे पुष्पकाख्ये
तन्मध्ये सूर्यबिम्बद्युतिसरसिरुहे शोभमानाष्टपत्रे।
पश्यन्निष्टाङ्गदीप्त्या जनकतनयया वामभागोपसेव्य-
स्सौमित्रिं भानुपुत्रं पवनसुतयुतं पातु मां रामचन्द्रः ॥८॥

विनीलजलदोपमं विमलचन्द्रबिम्बाननं
विनिद्रमणिकुण्डलं विकचपुण्डरीकेक्षणम्।
विभिन्नदनुजाधिपं विधृतबाणबाणासनं
विभीषणवरप्रदं विजयराममीडेऽनिशम् ॥९॥

राजद्राजीवनेत्रं रघुकुलतिलकं रञ्जिताशेषलोकं
वामाङ्कारूढसीतं वरशरधनुषं कुण्डलोद्दीप्तगण्डम्।
श्यामं शान्तं प्रसन्नं दरहसितमुखं वज्रसिंहासनस्थं
रामं राजत्किरीटं रविशतविशदं राजराजेशमीडे ॥१०॥

भद्रव्याख्यानमुद्रां करसरसिरुहे दक्षिणे धारयन्तं
सव्ये जानुन्युदारं करमपि च मुदा धारयन्तं स्फुरन्तम्।
पश्यन्तं वामभागे करधृतकमलां चित्रभूषाविशेषां
वैदेहीं काञ्चनाढ्यां स्तनभरनमितां भावये रामचन्द्रम् ॥११॥

विबुधविटपिमूले जानकी लक्ष्मणाभ्यां
सहितमनिलवेगं बाणमादाय चापम्।
बहुशरपटुतूणं रम्यपुष्पोपहारं
विबुधभरणचित्तं चिन्तये रामचन्द्रम् ॥१२॥

In Public domain. Digitization Muthulakshmi Research Academy

जानाति राम तव तत्त्वगतिं हनूमान्
जानाति राम तव सख्यगतिं कपीशः।
जानाति राम तव युद्धगतिं दशास्यो
जानाति राम धनदानुज एव सत्यम्॥१३॥

हे राम हे रमण हे जगदेकवीर
हे नाथ हे रघुपते करुणालवाल।
हे जानकी रामण हे जगदेकबन्धो
मां पाहि दीनमनिशं कृपणं कृतघ्नम्॥१४॥

अयोध्यानाथ राजेन्द्र सीताकान्त जगत्पते।
श्रीराम पुण्डरीकाक्ष रामचन्द्र नमोऽस्तु ते॥१५॥

दक्षिणे लक्ष्मणो धन्वी वामतो जानकी शुभा।
पुरतो मारुतिर्यस्य तं नमामि रघूत्तमम्॥१६॥

रामं राक्षसमर्दनं रघुपतिं शक्रारिविध्वंसिनं
सुग्रीवेप्सितराज्यदं सुरपतेः पुत्रान्तकं शार्ङ्गिणम्।
भक्तानामभयप्रदं भयहरं पापौघविध्वंसिनं
सीतासेवितपादपद्मयुगलं रामं भजे श्यामलम्॥१७॥

भवभयहरमेकं भानुकोटिप्रकाशं
करधृतशरचापं कालमेघावभासम्।
कनकरुचिरवस्त्रं रत्नवत्कुण्डलाढ्यं
कमलविशदनेत्रं सानुजं राममीडे॥१८॥

रामं श्यामपयोदनीलममलं राजीवनेत्रं सदा-
हल्याशापनिवारणप्रणयिपादाम्भोजमुर्वीश्वरम्।
विद्युत्कोटिसहस्रदीधितिलसत्कोटीरमस्त्रोज्ज्वलं
ध्याये तारकनाममीश्वरसखं दैतेयवंशापहम्॥१९॥

In Public domain. Digitization Muthulakshmi Research Academy

दशरथसुतमीशं दण्डकारण्यवासं
शतमखमणिनीलं जानकीप्राणलोलम्।
सकलभुवनमोहं सन्नुताम्भोददेहं
बहुलनुतसमुद्रं भावये रामभद्रम्॥२०॥

सरयूतीरवने लतानिवसने सद्रत्नवेदीतटे
सुमपर्यङ्कतले विदेहसुतया सार्धं परिक्रीडतः।
कस्तूरीघनसारचन्दनसमिलद्गन्धोल्लसत्पावनी
पायान्मूर्तिरनामया रघुपतेर्भद्रात्मिका नोऽनिशम्॥२१॥
वैदेहीप्रियवल्लभं विजयिनं वातात्मजाधीश्वरं
वाणीवारिधिवानरादिविनुतं वन्दारुमन्दारकम्।
विश्वामित्रवशिष्ठवासवशिवावाणीशशश्वन्नुतं
देवेशं विनतात्मजाभिविनुतं वन्दे सदा राघवम्॥२२॥

विशालनेत्रं परिपूर्णगात्रं सीताकलत्रं सुरवैरिजैत्रम्।
जगत्पवित्रं परमात्मतन्त्रं श्रीरामचन्द्रं प्रणमामि चित्ते॥२३॥

सौमित्रिमानार्णवपूर्णचन्द्र सीतालसल्लोचनपूर्णचन्द्र।
सुरारिवक्त्राम्बुजपूर्णचन्द्र संरक्ष मां राघवरामचन्द्र॥२४॥

यस्य किञ्चिदपि नो हरणीयं कर्म किञ्चिदपि नाचरणीयम्।
राम नाम च सदा स्मरणीयं लीलया भवजलं तरणीयम्॥२५॥

रङ्गमाणमभितो गृहाङ्गणे भृङ्गनीलमलकावृताननम्।
मङ्गलप्रदममङ्गलापहं सङ्गृणे दशरथात्मजं हृदि॥२६॥

दनुजतिमिरभानुं तापसैश्चिन्त्यमानं
शमितकलुषवारं सेवके दुष्टदूरम्।
दलितविषमसालं दण्डितारातिजालं
प्रणतशिखरिशत्रुं भव्यपाथोदगात्रम्॥२७॥

In Public domain. Digitization Muthulakshmi Research Academy

हे गोपालक हे दयाजलनिधे हे सद्गुणाम्भोनिधे
हे दैत्यान्तक हे विभीषणदयापारीण हे भूपते
हे वैदेहसुतामनोब्जविहृते हे कोटिमाराकृते
हे नव्याम्बुजनेत्र पालय परं जानामि न त्वां विना॥२८॥

साकेते प्रणवाख्यरत्नखचिते सिंहासने संस्थितं
विश्वामित्रवशिष्ठगालवमुखैराशीर्भिरञ्चज्जटैः।
पूज्यं पार्श्वगताब्जचारुनयना विद्युच्चलच्चामरं
वन्दे कोमलसुस्मिताननमिलारक्षावतीर्णं हरिम्॥२९॥
नित्यं निर्जितपङ्कसम्भवमहानेत्रश्रियं राघवं
रामं पार्वणचन्द्रचारुवदनं दिक्पालकैस्सेवितम्।
कर्पूणरागरुचन्दनार्द्रहृदयं मन्दारमालाञ्चितं
विद्युत्पुञ्जनिभाम्बरावृततनुं रामं भजे श्यामलम्॥३०॥

श्रीरामः कुशिकात्मजस्य वचनेनाकृष्य बाणासनं
मारीचं च सुबाहुकं शरयुगेनैवाहवे लीलया।
क्रामन् सुन्दरकाकपक्षरुचिरस्सौमित्रिणा संयुतः
पायान्नःकमलासनस्सकरुणः कालाम्बुदश्यामलः॥३१॥

आनन्दरूपं वरदं प्रसन्नं सिंहेक्षणं सेवकपारिजातम्।
नीलोत्पलाङ्गं भुवनैकमित्रं रामं भजे राघव रामचन्द्रम्॥३२॥

युद्धे वसन्नवृणदद्भुतबाणवर्षैः
रामः प्रहारसमये रजनीचराणाम्।
रक्षानुकूलसमयाय विभीषणाय
लङ्काधिपत्यमदिशद्रघुरामचन्द्रः ॥३३॥

वेदान्तगानं स्वकृतैकदानं हताभिमानं त्रिदशप्रधानम्।
गजेन्द्रयानं विगतावसानं श्रीरामचन्द्रं सततं नमामि॥३४॥

In Public domain. Digitization Muthulakshmi Research Academy
श्रीरामचन्द्रं धृतचापसायकं नीलोत्पलाभं नलिनायतेक्षणम्।
सौमित्रिणा सेवितपादपङ्कजं सीतासमेतं शरणं भजेऽनिशम्॥३५॥

श्रीरामचन्द्रकरुणाकरदीनबन्धो
सीतासमेतभरताग्रज राघवेश।
पापार्तिभञ्जनभयातुरदीनबन्धो
पापाम्बुधौ पतितमुद्धर मामनाथम्॥३६॥

इदं शरीरं श्लथसन्धिजर्झरं पतत्यवश्यं परिणामपेशलम्।
किमौषधं पृच्छसि मूढ दुर्मते निरामयं रामकथामृतं पिब॥३७॥

दशमुखगजसिंहं दैत्यगर्वातिरेहं
कदनभयदहस्तं तारकब्रह्मशस्तम्।
मणिखचितकिरीटं मञ्जुलालापवाटं
दशरथकुलचन्द्रं रामचन्द्रं भजेऽहम्॥३८॥

लङ्काविरामं रणरङ्गभीमं राजीवनेत्रं रघुवंशमित्रम्।
कारुण्यमूर्तिं करुणाप्रपूर्तिं श्रीरामचन्द्रं शरणं प्रपद्ये॥३९॥

रामचन्द्रमनिशं हृदयस्थं राममिन्दुवदनं प्रविभासम्।
भावयामि निगमान्तनिवासं भारतीपतिनुतं भववन्द्यम्॥४०॥

कौमारो रामचन्द्रः कमलमृदुपदा शोभयन्भूमिभागं
मातुश्चानन्दकारी मरकतनिकराकार इन्दीवराक्षः।
उत्सङ्गे सन्निविष्टः पितुरमरवरैः स्तूयमानोपकारो
नानालङ्कारभूषस्स्फुरतु मम सदा मायया राम ईशः॥४१॥

सन्नद्धः कवची खड्गी चापबाणधरो युवा।
गच्छन्ममाग्रतो नित्यं रामः पातु सलक्ष्मणः॥४२॥

सुग्रीवमित्रं परमं पवित्रं सीताकलत्रं नवहेमसूत्रम्।
कारुण्यपात्रं शतपत्रनेत्रं श्रीरामचन्द्रं शिरसा नमामि॥४३॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीराघवेति रमणेति रघूद्वहेति रामेति रावणहरेति रमाधवेति।
साकेतनाथ सुमुखेति च सुव्रतेति वाणी सदा वदतु राम हरे हरेति॥४४॥

जयतु जयतु रामो जानकीवल्लभोऽयं
जयतु जयतु रामश्चन्द्रचूडार्चितांघ्रिः।
जयतु जयतु वाणीनाथनाथः परात्मा
जयतु जयतु रामोऽनाथनाथः कृपालुः॥४५॥

वरं न याचे रघुनाथ युष्मत्पादाब्जभक्तिस्सततं ममास्तु।
इदं प्रियं नाथ वरं प्रयच्छ पुनःपुनस्त्वामिदमेव याचे॥४६॥

अम्भोधिरोषादरुणायमाने नाथस्य दृष्ट्वा नयने रघूणाम्।
मरुद्गणैस्तत्क्षणमाशशङ्के मन्दाकिनीमङ्गलसूत्रभङ्गम्॥४७॥

अम्भोधिस्मयबन्धनेन जगदानन्देन भूपुत्रिका-
स्वान्ताब्जाम्बुजबान्धवेन नतरक्षायत्तचित्तेन च
कर्णालम्बितकुण्डलेन दिविषत्त्राणोद्यमेनाश्रित-
श्रेयः कल्पनगेव मे मतिरियं रामेण संवर्धताम्॥४८॥

आदौ रामजनिः कुमारगमनं यज्ञप्रतीपालनं
शापादुद्धरणं धनुर्विदलनं सीताङ्गनोद्वाहनम्।
लङ्काया दहनं समुद्रतरणं सौमित्रिसम्मोहनं
रक्षस्संहरणं स्वराज्यगमनं चैतद्धि रामायणम्॥४९॥

जन्मादौ क्रतुरक्षणं मुनिपतेस्स्थाणोर्धनुर्भञ्जनं
वैदेहीग्रहणं पितुश्च वचनाद्धोराटवीगाहनम्।
कोदण्डग्रहणं खरादिमदनं मायामृगच्छेदनं
बद्धाब्धिक्रमणं दशास्यनिधनं चैतद्धि रामायणम्॥५०॥

In Public domain. Digitization Muthulakshmi Research Academy

पूर्वं रामतपोवनानुगमनं हत्वा मृगं काञ्चनं
वैदेहीहरणं जटायुमरणं सुग्रीवसंभाषणम्।
वालेर्निग्रहणं समुद्रतरणं लङ्कापुरीदाहनं
पश्चाद्रावणकुम्भकर्णनिधनं चैतद्धि रामायणम्॥५१॥

शान्तं शारदचन्द्रकोटिसदृशं चन्द्राभिरामाननं
चन्द्रार्काग्निविकासिकुण्डलधरं चन्द्रावतंसस्तुतम्।
वीणापुस्तकसाक्षसूत्रविलसद्व्याख्यानमुद्राकरं
देवेशं भरतादिभिः परिवृतं रामं भजे श्यामलम्॥५२॥

कृष्णं भीमधनुःकठोरनिनदं ब्रह्मादिसंविस्मयं
भास्वद्वाजिगतेरमार्गमनिशं शम्भोश्शिरःकम्पनम्।
दिग्दन्तिस्खलनं कुलाद्रिचलनं सप्तार्णवोन्मीलनं
वैदेहीमदनं मदान्धदमनं त्रैलोक्यसम्मोहनम्॥५३॥

कञ्जातपत्रायतलोचनाय कर्णावतंसोज्ज्वलकुण्डलाय।
कारुण्यपात्राय सवंशजाय नमोऽस्तु रामाय सलक्ष्मणाय॥५४॥

विद्युन्निभाम्भोदसुविग्रहाय विद्याधरैस्संस्तुतसद्गुणाय।
वीरावताराय विरोधिहन्त्रे नमोऽस्तु रामाय सलक्ष्मणाय॥५५॥

संसक्तदिव्यायुधकार्मुकाय समुद्रगर्वापहरायुधाय।
सुग्रीवमित्राय सुरारिहन्त्रे नमोऽस्तु रामाय सलक्ष्मणाय॥५६॥

पीताम्बरालंकृतमध्यकाय पितामहेन्द्रामरवन्दिताय।
पित्रे स्वभक्तस्य जनस्य मात्रे नमोऽस्तु रामाय सलक्ष्मणाय॥५७॥

नमो नमस्तेऽखिलपूजिताय नमो नमश्चन्द्रनिभाननाय।
नमो नमस्ते रघुवंशजाय नमोऽस्तु रामाय सलक्ष्मणाय॥५८॥

इमानि पञ्चरत्नानि त्रिसन्ध्यं यः पठेन्नरः।
सर्वपापविनिर्मुक्तस्स याति परमां गतिम्॥५९॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरामः कल्पवृक्षो मे विरामस्सकलापदाम्।
अभिरामस्त्रिलोकानां रामः क्षेमं करोतु नः ॥ ६०॥

हृदय! सदयचिन्तं चित्तनाथं गुणाना-
मुदधिमुरुगुणाढ्यं निम्नगालंकृतांघ्रिम्।
जनकपतितनूजास्वान्तकान्तोत्पलस्य
स्फुरणकिरणचन्द्रं रामचन्द्रं भजस्व ॥६१॥

वदतु वदतु वाणी राम रामेति नित्यं
भजतु भजतु चित्तं रामपादारविन्दम्।
नमतु नमतु देहं सन्ततं रामचन्द्रं
न भवतु मम पापं जन्मजन्मान्तरेषु ॥६२॥

चापबाणधरस्सीताकामदः कान्तिमान्नरः।
सीतालक्ष्मणसंयुक्तः पातु मां राघवेश्वरः ॥६३॥

प्रातः स्मरामि रघुनाथमुखारविन्दं
मन्दस्मितं मधुरभाषिविशालफालम्।
कर्णावलम्बिचलकुण्डलगण्डभागं
कर्णान्तदीर्घनयनं नयनाभिरामम् ॥६४॥

प्रातर्भजामि रघुनाथकरारविन्दं
रक्षोगणाय भयदं वरदं निजेभ्यः।
यद्राजसंसदि विभिद्य महेशचापं
सीताकरग्रहणमङ्गलमाप सद्यः ॥६५॥

प्रातर्नमामि रघुनाथपदारविन्दं
पद्माङ्कुशादिशुभरेखशुभावहं च।
योगीन्द्रमानसमधुव्रतसेव्यमानं
शापापहं सपदि गौतमधर्मपत्न्याः ॥६६॥

In Public domain. Digitization Muthulakshmi Research Academy

प्रातर्वदामि वचसा रघुनाथ नाम
वाग्दोषहारि सकलं कलुषं निहन्तृ।
यत्पार्वती स्वपतिना सह भोक्तुकामा
प्रीत्या सहस्रहरिनामसमं जजाप॥६७॥

प्रातश्श्रये श्रुतिनुतां रघुनाथमूर्तिं
नीलाम्बुदोत्पलसितेतररत्ननीलाम्।
आमुक्तमौक्तिकविशेषविभूषणाढ्यां
ध्येयां समस्तमुनिभिर्निजभृत्यमुख्यैः॥६८॥

यश्श्लोकपञ्चकमिदं नियतः पठेत
नित्यं प्रभातसमये पुरुषः प्रबुद्धः।
श्रीरामकिङ्करजनेषु स एव मुख्यो
भूत्वा प्रयाति हरिलोकमनन्यलभ्यम्॥६९॥

किं मन्त्रैर्बहुभिश्च दुष्करफलैरायासदैस्तद्विदां
किञ्चिल्लोपविधानमात्रविफलै स्संसारदुःखावहैः।
एकस्सन्नपि सर्वमन्त्रफलदो दोषोज्झितस्सर्वधा
श्रीरामश्शरणं ममेति परमो मन्त्रोऽयमष्टाक्षरः॥७०॥

रामभद्राश्रयस्साक्षाद्रामभद्रो न संशयः।
तत्र कोदण्डतूणीरावत्र दण्डकमण्डलू॥७१॥

रघुनाथपदारविन्दयोस्ते भ्रमरीभूतमघान्धकारसूर्य।
अपराधशतालयं कलौ मामनुगृह्णासि हि मङ्गलैः कटाक्षैः॥७२॥

राम राम तव नाम जपन्तः पामरा अपि तरन्ति भवाब्धिम्।
अङ्गसङ्गिभवदङ्गुलिमुद्रः किं विचित्रमतरत्कपिरब्धिम्॥७३॥

श्रीरामनामामृतमन्त्रबीजं सञ्जीवनं चेन्मनसि प्रतिष्ठम्।
हालाहलं वा प्रलयानलं वा मृत्योर्मुखं वा वितथीकरोति॥७४॥

In Public domain. Digitization Muthulakshmi Research Academy

हा कृष्णाच्युत हा कृपालय हरे हा पाण्डवानां सखे
क्वासि क्वासि सुयोधनाद्यपकृतां हा रक्ष मां द्रौपदीम्।
इत्युक्तोऽक्षयवस्त्ररक्षिततनुं योऽरक्षदापद्गता-
मार्तत्राणपरायण स्सभगवन्नारायणो मे गतिः ॥७५॥

इन्दीवरदलश्याममिन्दुकोटिनिभाननम्।
कन्दर्पकोटिलावण्यं वन्देऽहं रघुनन्दनम् ॥७६॥

किं योगशास्त्रैः किमशेषदानैः*
किं यागगङ्गादिविशेषतीर्थैः।
किं ब्रह्मचर्याश्रमसञ्चरेण
भक्तिर्न चेत्ते रघुवंशकीर्त्याम् ॥७७॥

हे रामभद्राश्रय हे कृपालो
हे भक्तलोकैकशरण्यमूर्ते।
पुनीहि मां त्वच्चरणारविन्दं
जगत्पवित्रं शरणं ममास्तु ॥७८॥

श्रीरामचन्द्रे श्रितयोगिचन्द्रे
प्रसन्नमूर्तौ परिदृश्यमाने
तापत्रयं नाशमुपैति पुंसां
ममान्धकारं विनिहन्तु सद्यः ॥७९॥

नीलाभ्रदेह निखिलेश जगन्निवास
राजीवनेत्र रमणीयगुणाभिराम
श्रीराम दैत्यकुलमर्दन रामचन्द्र
त्वत्पादपद्ममनिशं कलयामि चित्ते ॥८०॥

* विद्यया

In Public domain. Digitization Muthulakshmi Research Academy

कुवलयदलनीलः पीतवासाः स्मितास्यो
विविधरुचिरभूषाभूषितो दिव्यमूर्तिः ।
दशरथकुलनाथो जानकीप्राणनाथो
निवसतु मम चित्ते सर्वदा रामचन्द्रः ॥८१॥

सजलजलदनीलं सन्मुनिस्तुत्यलीलं
सुगमनिगममूलं यातुधानान्तकालम् ।
दशरथनृपबालं सत्कृपापूर्णलोलं
भजतु भुवनखेलं भक्तसंस्तुत्यशीलम् ॥८२॥

दशरथवरपुत्रं जानकीसत्कलत्रं
दशमुखहरदक्षं पद्मपत्रायताक्षम् ।
करधृतशरचापं चारुमुक्ताकलापं
रघुकुलजवरेण्यं राममीडे शरण्यम् ॥८३॥

रामं वीरासनस्थं विमलरविनिभं भासमानस्वरूपं
श्यामं सीतासमेतं स्मितरुचिरमुखं कुण्डलोद्दीप्तगण्डम् ।
श्रीवत्सश्रीनिवासं सुरविटपितटन्यस्तसिंहासनस्थं
दिव्याकल्पोज्ज्वलाङ्गं दिविजपतिनुतं ध्यानयज्ञेन यक्ष्ये ॥८४॥

श्रीरामभद्राश्रितसद्गुरूणां पादारविन्दं भजतां नराणाम् ।
आरोग्यमैश्वर्यमनन्तकीर्तिरन्ते च विष्णोः पदमस्ति सत्यम् ॥८५॥

रणहतदनुजेन्द्रो राजराजात्मचन्द्र-
स्समदरिपुमृगेन्द्रस्सन्मनोऽम्भोधिचन्द्रः ।
ललितघननरेन्द्रो लक्ष्मणानन्दसान्द्रो
महितसुजनचन्द्रो मैथिलीप्राणचन्द्रः ॥८६॥

नमः कोदण्डहस्ताय सन्दीपितशराय च ।
दण्डिताखिलदैत्याय रामायापन्निवारिणे ॥८७॥

In Public domain. Digitization Muthulakshmi Research Academy

न जानन् जानकीजानिं रामं तत्त्वमपि प्रभुम् ।
धिक्कुर्याद्यमदूतान् यो नर स्तत्तत्त्वमीहते ॥८८॥

रामो मे हृदि सन्निधिं रचयतां रामं भजे दुष्कृतं
रामेणापहृतं नमो भगवते रामाय रामाच्छुभम्।
लक्ष्ये श्रीरघुनन्दनस्य सुकृतेर्दासोऽस्म्यहं सर्वदा
नित्यं कोसलकन्यकाप्रियसुते रामे मनो वर्तताम्॥८९॥

कोदण्डनिर्मुक्तशराग्रखण्डनं प्रदण्डशश्वद्भुजदण्डहिंडनम्।
अखण्डचण्डांशुसमानचण्डनं भजामि रामं रणरङ्गमण्डनम्॥९०॥

सिंहासनस्थं मुनिसिद्धसेव्यं रक्तोत्पलालंकृतपादपद्मम्।
सीतासमेतं शशिसूर्यनेत्रं रामं भजे राघवरामचन्द्रम्॥९१॥

दयारूपे भूपे रघुकुलकलापे सुहृदये
भुजास्तम्भे दम्भेतरविजयगुम्भे विहरताम्।
महावीरे धीरे दशरथकुमारे परिसर-
द्रुणारामे रामे दशमुखविरामे मम मनः॥९२॥

गतेष्वनेकेषु भवेषु पापव्रतेष्वपूर्णेषु च योगतीर्थैः।
विस्रस्तसर्वाघनृणां कुलेशे न जायते भक्तिरनन्तमीडे॥९३॥

श्रीरामभद्राश्रितयोगिवर्यपादाब्जयुग्मं सततं भजेऽहम्।
यच्चक्षुषी धामघनप्रवेशे तच्चक्षुषी पश्यति यस्य चेतः॥९४॥

न ग्रस्तस्तमसा न चाह्नि मलिनो दर्शेन नो कर्षितो
नैवास्तं गतवान् न चाङ्कितततनुर्नो पाक्षिकश्रीरपि।
लोकालोकनगेन्द्रलङ्घनविधौ नो पङ्गुभावं गतो
निर्दोषो गुणसागराद्रघुपतेर्जातो यशश्चन्द्रमाः॥९५॥

नागानामयुतं तुरङ्गनियुतं सार्धं रथानां शतं
पादाताश्शतकोटियुद्धदलिता नृत्यत्कबन्धे रणे

In Public domain. Digitization: Muthulakshmi Research Academy

एवं कोटिसहस्रदुर्जननिधौ यश्चज्वलद्घण्टिका
यामार्धं परमात्मनो रघुपतेः कोदण्डघण्टारवः ॥९६॥

भजेऽहं सदा राममिन्दीवराभं
भवारण्यदावानलाभाभिधेयम्।
भवानीहृदा भावितानन्दरूपं
भवाभावहेतुं भवानीप्रसन्नम् ॥९७॥

सुरानीकदुःखौघनाशैकहेतुं
नराकारदेहं निराकारमीड्यम्।
परेशं परानन्दरूपं वरेण्यं
हरिं राममीशं भजे भारनाशम् ॥९८॥

प्रसन्नाखिलानन्ददोहप्रसन्नं
प्रसन्नार्तिनिश्शेषनाशाभिधानम्।
तपो योगयोगीशभावाभिभाव्यं
कपीशादिमित्रं भजे रामचन्द्रम् ॥९९॥

स्फुरद्रत्नकेयूरहाराभिरामं
धराभारभूतासुरानीकदावम्।
शरच्चन्द्रवक्त्रं लसत्पद्मनेत्रं
दुरासाद्यपादं भजे रामचन्द्रम् ॥१००॥

सुराधीशनीलाभ्रनीलाङ्गकान्तिं
विराधादिरक्षोगणानीकनाशम्।
किरीटादिशोभं पुरारातिलाभं
भजे रामचन्द्रं रघूणामधीशम् ॥१०१॥

In Public domain. Digitization Muthulakshmi Research Academy

लसच्चन्द्रकोटिप्रकाशादिपीठे
समासीनमङ्के समाधाय सीताम्।
स्फुरद्धेमवर्णां तटित्पुञ्जभासां
भजे रामचन्द्रं निवृत्तार्तितन्द्रम्॥१०२॥

सदा भोगभाजां सुदूरे वसन्तं
सदा योगभाजामदूरे विभान्तम्।
चिदानन्दकन्दं सदा राघवेशं
विदेहात्मजानन्दकन्दं प्रपद्ये॥१०३॥

महायोगमायाविशेषानुयुक्तो
विभासीशलीलानराकारवृत्तिः।
त्वदानन्दलीलाकथापूर्णकर्णा-
स्सदानन्दरूपा भवन्तीह लोके॥१०४॥

यस्य प्राणनिवारणावनकृते स्यातां निदाने विभा-
रैन्द्रेर्ध्वाक्षपतेः कृपाजलनिधेः कोपप्रसादौ मुदे।
भूयाद्वासवनीलसन्निभतनुर्वामाङ्कसीदद्वधू-
स्सोऽयं दुष्टनिशाटपाटनपटुश्श्रीराघवो व स्सदा॥१०५॥

दुष्टो वा कलुषात्मकोऽपि पिशुनो दुर्मार्गसञ्चारवान्
मातृघ्नोऽपि पितृघ्नवर्त्मनि रतस्सन्मौनिनिन्दापरः।
योऽदःश्रुत्यमृतं हितं मधुरसं वक्ता च श्रोता लिखन्
स प्राप्नोति निरन्तरैहिकसुखं निर्वाणसौख्यं ततः॥१०६॥

रघुकुलवरनाथो जानकीप्राणनाथः
पितृवचनविधाता कीशराज्यप्रदाता।
निशिचरपतिनाशः प्राप्तराज्यप्रवेशो
विहितभुवनरक्षः पातु पद्मायतताक्षः॥१०७॥

*****

In Public domain. Digitization Muthulakshmi Research Academy

अ

अक्षीणबाणतूणीरः - III.१०७.53
अग्रे प्राञ्जलिमाञ्ज - I .४८.10
अचिन्त्यमव्यक्तमनन्तरूपं - III.६२.46
अज्ञानगाढतिमिराप - I. २०. 21
अज्ञानसम्भवभवाम्बुधि - II.११५.36
आदौ रामजनिः कुमारगमनं - IV. ४९.62
अनन्तकीर्तिं वरदं प्रसन्नं - III.६०.46
अनर्घमणिपूरकोल्लसित दिव्यतेजः परम् - II.६४.30
अनर्घ्यमाणिक्य - II.९.20
अम्बोधिरोषादरुणायमाने - IV.४७.62
अम्बोधिस्मयबन्धनेन - IV.४८.62
अम्भोधरश्याम - I.४३.9
अयोध्यानाथ - IV. १५. 58
अयोध्यपुरमण्टपे स्फुरितसिंहपीठे - II.७०. 29
अर्धं रक्तपदाब्जनीलरुचिरं - २-१०३-३५
अलं विवादेन न मानुषोऽयं - १-७७-१४
अलं शास्त्राभ्यासै - १-६१-११
असितकमलभासा - १-३३-७

आ

आकर्णान्तगुणोल्लसच्चरमजं ३-१६-३९
आकर्ण्यमारूढ १-८१-१४
आजानुबाहुमरविन्ददृश ३-५४-४५
आनन्दकन्दमरुणाधर २-३-१९
आनन्दरूपं वरदं प्रसन्नं ४-३२-६०
आरामं बैभवाना अभिनव सुपथं ३-३-३७
आमीलयन्दशशिरोवदनाम्बुजात ३-५६-४६
आलोलस्फुटरत्नकुण्डलधरं २-१५-२०
आसाद्य नगरीं म-१३-२

इक्ष्वाकुनन्दनं १-५८-११
इक्ष्वाकुवंशार्णवजातरत्नं १-१०८-३५
इच्छमो हि महाबाहुं ३-११५-५४
इदं शरीरं श्लथसन्धि ४-३७-६१
इन्दीवरदलश्याम ४-७६-६६
इन्दीवरदलश्यामः पुण्डरीकनिभेक्षणः ३-११४-५४
इन्द्रनीलमणि सन्निभदेहं १-९४-१७
इमानि पञ्चरत्नानि ४-५९-६३

उ

उत्फुल्लामलकोमलो १-७४-१३

ए

एकान्ते कमले जले विकसिते २-७८-३१
एकेन बाणमपरेण करेण चापं ३-५५-४६
एतौ तौ दशकण्ठकण्ठ १-८२-१५

ओ

ओतप्रोत समस्तवस्तुनिचयं २-५०-२६

क

कञ्जातपत्रायतलोचनाय ४-५४-६३
कदा सुरतस्थले कनकमण्टपे ४-५-५६
कदा वा साकेते तरुण १-६४-१२
कदा वा साकेते मणि १-६४-१२
कदा वा साकेते विमल १-६३-१२
कठान्ताक्षराख्ये जगत्प्राण २-८४-३२
कनकनिकषभासा १-६०-११
कन्दर्पायुतकोटिकोटि २-५-१९
करतलधृतचापं कालमेघस्वरूपं ३-७७-४९
करे दिव्यचक्रं २-१९-३३
कर्णान्तविश्रान्त २-१२-२०

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain, Digitization Muthulakshmi Research Academy

कर्पूरमङ्गविलोचनं रघुवरं १-४५-९
कलम्बकोदण्ड २-२६-२२
कल्याणदं कौशिकयज्ञपालं १-७१-१३
कल्याणानां निधानं कलिमलमथनं ३-९०-५१
कस्तूरीघनसारकुङ्कुम २-३७-२४
कस्तूरीतिलकं कपीन्द्रहरणं ३-२६-४१
किं मन्त्रैर्बहुभिश्च ४-७०-६४
किं योगशास्त्रैः ४-७७-६६
कुवलयदलनीलः ४-८१-६७
कृत्याकृत्यविवेकहीनमनसां ३-९७-५१
कृष्णं भीमधनुः ४-५३-६३
केयूराङ्गदकङ्कणैः १-९०-१६
कोदण्डदण्ड विनिवेशितबाहुदण्डं ३-५२-४५
कोदण्डदीक्षागुरुमप्रमेयं १-४४-९
कोदण्डदीक्षागुरुमादिमूलं २-५२-२६
कोदण्डनिर्मुक्तशराग्रखण्डनं ४-९०-६८
कोदण्डमिक्षु जनितं २-२७-२२
कौमारो रामचन्द्रः ४-४१-६१
कौसल्यानयनेन्दुं ३-९१-५१
कौसल्यावीरगर्भाम्बुधिघनविलसत् ३-८७-५०
कौसल्यालसदालवालजनितः ३-११०-५३

ख

खश्यामं खगवाहनं २-३२-२३

ग

गतेष्वनेकेषु भवेषु ४-९३-६८

च

चतुर्वेद कूटोल्लसत्कारणाख्यं ३-९२-३३
चन्द्रोपमं मलयचन्दन १-५७-११
चलत्कनककुण्डलोल्लसित दिव्यगण्डस्थल २-७२-३०
चापबाणधरस्सीताकामदः ४-६३-६४

चिदंशं समानन्दमानन्दकन्दं २-७९-३२
In Public domain. Digitization Muthulakshmi Research Academy
चेतः स्थितं चिन्तक चिन्तनीयं ३-१०२-५२

ज

जगति विशदमन्त्रं १-५५-११
जनको रामचन्द्रो १-५४-१०
जननी जानकी १-५३-१०
जन्मादौ क्रतुरक्षणं ४-५०-६२
जय जय रघुराम १-१००-१७
जय जय वरशङ्खश्री १-१०१-१७
जयतु जयतु मन्त्रं जन्म २-११४-३६
जयतु जयतु रामो ४-४५-६२
जयतु विजयकारी जानकीमोदकारी ३-१०१-५२
जलनिधिकृतसेतुं ३-१०-३८
जाग्रत्स्वप्नसुषुप्तिकालविलसत् २-७५-३०
जातिभ्रष्टोऽतिपापी ३-१२३-५५
जानक्याः कमला १-८४-१५
जानाति राम तव तत्त्वगतिं ४-१३-५८
जानाति राम तव नामरुचिं १-३६-८

ड

डफाक्षान्तराख्ये मणिव्रातपूरे २-८३-३१
डापान्ताक्षरपङ्कजे २-५५-२७
डिण्डीरहासमणिकुण्डलचारुकर्णं ३-६४-४७

त

तरुणौ रूपसम्पन्नौ ३-८९-५१
तारं तारकमण्डलोपरि १-३६-२४
ताराकारं निखिलनिलयं १-४३-२५
ताराकार विमानमध्यनिलयं १-३५-२३
त्यक्तसाकेतवासाय म-६-१
त्रिदशकुमुदचन्द्रो ३-१३-३९

In Public domain. Digitization Muthulakshmi Research Academy

दण्ड[illegible] [illegible]-८-१
दनुजतिमिरभानुं ४-२७-५९
दयानिधे राघव रामचन्द्र ३-१०६-५३
दयारूपे भूपे ४-९२-६८
दशमुखगजसिंहं दैत्यगर्वातिरंहं ४-३८-६१
दशरथवरपुत्रं जानकीसत्कलत्रं ४-८३-६७
दशरथसुतमन्त्रं दैत्यसंहारमन्त्रं २-११२-३६
दशरथसुतमीशं ४-२०-५९
दक्षिणे लक्ष्मणो धन्वी ४-१६-५८
दिगम्बरं किङ्किणि २-८-२०
दिव्यारण्ययतीन्द्रनामनगरे ३-३०-४१
दिव्यस्यन्दनमध्यगं १-३७-८
द्विपत्राब्जमध्ये मनस्तत्त्वरम्ये २-८६-३२
दीर्घबाहुमरविन्दलोचनं ३-१०६-५३
दुरिततिमिरचन्द्रो १-७०-१३
दुष्टो वा कलुषात्मकोऽपि ४-१०६-७०
देवानां जितकारणेन भुवने ३-४९-४५
देवेन्द्रनीलनवमेघ २-४९-२६
देवेन्द्रेण समर्पिते ध्वजयुते ३-१८-३९
दैतेयोदग्रसेव्यं पटुतरविशिख ३-८६-५०
दोर्दण्डेन च १-५०-१०
दोर्भिः खड्गं त्रिशूलं १-६९-१३

ध

ध्याये त्वां नवविद्रुमस्फुटतनु २-७६-३०
ध्याये त्वां रविमण्डलेन्दुधवले २-८०-३१
ध्याये त्वां हृदायाम्बुजे २-४०-२४
ध्याये प्रातस्सुरेशं १-८७-१५
ध्याये रामं सुधांशुं १-८१-१६

In Public domain. Digitization Muthulakshmi Research Academy

न ग्रस्तस्तमसा न ४-९५-६८
न जानन् जानकीजानिं ४-८८-६८
नदीरमणबन्धनं मतिमतां ४-६-५६
नमो नमस्तेऽखिलपूजिताय ४-५८-६३
नमः कोदण्डहस्ताय ४-८७-६७
न हि माता न हि तातो ३-१७-३९
नागानामयुतं तुरङ्गनियुतं ४-९६-६८
नादं नादविलीन २-३०-२३
नानादिव्यास्त्रतेजः ३-८३-५०
नामस्तोत्रपवित्रित २-३१-२३
निखिलनिलयमन्त्रं नित्य तत्त्वाख्यमन्त्रं २-११०-३६
निगमशिखररत्नं नित्यमाशास्यरत्नं ३-१११-५३
निगमशिखररत्नं निर्मलानन्दरत्नं २-१०७-३५
निजानन्दाकारं २-४५-२५
नित्यं निर्जित पङ्कसम्भव ४-३०-६०
नित्यं नीरजलोचनं २-३९-२४
नित्यं श्रीराममन्त्रं १-८५-१५
नीलाब्दबृन्दसदृशं १-४६-९
नीलाभ्रदेह निखिलेश ४-८०-६६

प

पटुतरजलवाहध्वानमादाय ३-१०९-५३
पद्मासनस्थं सुरसेवितव्यं ३-६१-४६
परं पवित्रं परवासुदेवं २-९६-३३
परगुणमणिसिन्धुः ३-१२-३८
परानन्दवस्तुस्वरूपादिसाक्षिं २-९५-३३
प्रणवनिलयमन्त्रं प्राणिनिर्वाणमन्त्रं २-१११-३६
प्रसन्नाखिलानन्ददोहप्रसन्नं ४-९९-६९
प्रसूनबाणाश्चित २-२३-२२
प्रतार्नमामि रघुनाथ पदारविन्दं ४-६६-६४

In Public domain. Digitization Muthulakshmi Research Academy

प्रातर्भजामि रघुनाथ करारविन्दं ४-६५-६४
प्रातर्वदामि वचसा ४-६७-६५
प्रातश्श्रये श्रुतिनुतां ४-६८-६५
प्रातस्स्मरामि रघुनाथ मुखारविन्दं ४-६४-६४
पितृभक्ताय म-५-१
पीताम्बरालङ्कृतमध्यकाय ४-५७-६३
पूर्वं रामतपोवनानुगमनं ४-५१-६३
पौगण्डे हितबालकैः परिवृतः ३-७२-४८

ब

बलान्ताक्षरप्रान्तषट्पत्रपद्मे २-८२-३१
बहूरुपादोदर २-२४-२२
ब्रह्माण्डं दलयन् वियद्विदलयन् ३-६६-४७
ब्रह्मादियोगिमुनिपूजित १-७१-१४
ब्रह्मामृतानन्द १-५९-११
ब्रह्माद्यामरसिद्धजन्मभुवनं १-३८-८

भ

भङ्गोतुङ्गमयामृताब्धिलहरी मध्ये - ९८-२७
भजेऽहं सदा राममिन्दीवराभं - ४-९७-६९
भद्राख्यानमुद्रां करसरसिरुहे ४-११-५७
भर्जनं भवबीजानां अर्जनं ३-९४-५१
भर्गब्रह्मसुरेन्द्र १-४७-९
भवभयहरमेकं ४-५८-१८
भूकम्पं जनयन्नभोविदलयन् १-५१-१०
भ्रूमध्ये निगमागमोज्ज्वलपदे २-५८-२७

म

मङ्गलं कोसलेन्द्राय म-२-१
मङ्गलं भगवान् म-१-१
मज्जीवं मदनुग्रहं २-३८-२४
मनस्थं मनोऽन्तस्थमाद्यन्तरूपं २-९४-३३
मध्याह्ने रामचन्द्रं १-८८-१६

मन्दस्मितं कुण्डलगण्ड भागं ३-६३-४७
In Public domain. Digitization Muthulakshmi Research Academy
मन्दारमूले मणिपीठसंस्थं २-८-२०
महायोगमायाविशेषानुयुक्तो ४-१०४-७०
माणिक्यमञ्जीरपदारविन्दां ३-१००-५२
माता रामो १-४०-८
मातुः पार्श्वे चरन्तं १-९८-१७
मार्गे मार्गे शाखिनां १-६६-१२
मुकुर रुचिरगण्डं पुण्डरीकाभतुण्डं ३-४१-४५
मुक्तेर्मूलं मुनिवर २-४४-२५
मूलादिषट्सरसिजान्त २-१८-२१
मूलाधार धनञ्जय २-३४-२३
मूलाधारसरोरुहे हुतवहस्थाने २-५३-२६
मूले कल्पद्रुमस्याखिल १-४१-८
मेघश्यामलमम्बुजातनयनं ३-२९-४१

य

यः पृथ्वीभरवारणाय ३-७८-४९
यश्चण्डगाम्भीर्य धनुर्विजेता ३-६७-४७
यत्पादपङ्कजरजः ३-१२१-५५
यत्पादाम्बुजरेणुना मुनिसती ३-३२-४२
यत्पादाम्बुज सम्भवा त्रिपथगा ३-३१-४२
यद्रूपमानन्दकरं २-२९-२२
यन्नामैव सहस्रनामसदृशं ३-२०-४०
यस्यावतारचरितानि ३-१२२-५५
यस्य किञ्चिदपि नो हरणीयं ४-२५-५९
यस्य प्राणनिवारणावनकृते ४-१०५-७०
यश्श्लोकपञ्चकमिदं ४-६९-६५
या कृपा मुनिसन्त्राणे ३-१०५-५३
युद्धे वसन्नवृणदद्भुत ४-३३-६०
युद्धे सन्नद्ध शस्त्रं कपिवरभयदं ३-८५-५०
यो दण्डकारण्यनिशाचरेन्द्रान् ३-८८-५०

In Public domain, Digitization Muthulakshmi Research Academy
रक्ताम्भोरुहलोचनं ४-७-५७
रघुकुलवरनाथो ४-१०७-७०
रघुनन्दन एव दैवतं १-७३-१३
रघुनाथपदारविन्दयोस्ते ४-७२-६४
रङ्गमाणमभितो ४-२६-५९
रणहतदनुजेन्द्रो ४-८६-६७
रत्नोल्लसज्ज्वलितकुण्डलगण्डभागं ३-७४-४८
राकाचन्द्रनिभाननं २-१४-२०
राजद्राजीवनेत्रं ४-१०-५७
राजीवायतलोचनं १-७५-१३
राजीवनेत्र रघुपुङ्गव ३-५०-४५
रामचन्द्रचरणारविन्दयोः ३-८०-४९
रामचन्द्रचरिताकथामृतं १-२३-५
रामचन्द्रमनिशं हृदयस्थं ४-४०-६१
रामचन्द्रदयासान्द्र १-९६-१७
रामचन्द्रसरितामृतपानं ३-११८-५४
रामभद्राश्रयस्साक्षाद्रामभद्रो ४-७१-६५
रामाभिरामं १-९९-१७
राममिन्दीरश्यामं ३-८२-४९
राशब्दोच्चारमात्रेण १-१०४-१७
रामं श्यामाभिरामं १-२२-५
रामस्सीतासमेतो १-१७-४
राम रामतव नाम ४-७३-६५
राम नाम दयासिन्धो ३-११९-५४
रामो बद्धपयोनिधिर्गुणनिधिः ३-७३-४८
रामो नाम बभूव हुं ३-११६-५४
रामो मत्कुलदैवतं १-२४-६
रामो मे हृदिसन्निधिं ४-८९-६८

In Public domain, Digitization Muthulakshmi Research Academy

रामं कोमलनीलनीरदनिभं ३-८-३८
रामं कोमलनीलमेघविलसत् ३-५-३७
रामं कोशिकगौतमप्रियकरं ३-४३-४४
रामं चन्दनशीतलं १-२१-५
रामं पुराणपुरुषं रमणीयवेषं ३-५७-४६
रामं रक्तसरोरुहाक्षममलं ३-२३-४०
रामं रत्नकिरीटकुण्डलधरं १-१६-४
रामं रम्यगुणं रमापतिसमं ३-७-२८
रामं राक्षसमर्दनं ४-५८-१७
रामं राक्षसमर्दनं रघुवरं ३-२२-४०
रामं राक्षसवंशनाशनकरं २-४२-२५
रामं राजशिखामणिं १-१८-५
रामं राजशिखामणिं रघुवरं ३-४-३७
रामं वीरासनस्थं ४-८४-६७
रामं वीरसनस्थं १-१९-५
रामं श्यामपयोदनीलममलं ४-१९-५८
रामं श्यामलमेघकोमलरुचिं ३-६-३७
रामं सीतासमेतं विमलरवि ३-९-३८
रामं सौमित्रिमित्रं १-२०-५
रामं हेमतटित्प्रभांशुकधरं ३-२३-४०
रामः पातु सदैव ममारिभयात् ३-८१-४९
रामः पिता राघव एव माता ३-१०४-५२
रामः प्राञ्जलिमग्रतोऽनिलसुत ३-७१-४८
रुचिरमणिकिरीटं ३-१९-३९

ल

लङ्काविरामं रणरङ्गभीमं ४-३९-६१
लसच्चन्द्रकोटिप्रकाशादिपीठे ४-१०२-७०
लसद्दिव्यशोषाचले योगपीठे २-९३-३३
ललाटदेशोज्ज्वल २-१०-२०

लोकत्राणानुकारी १-७८-१४
लोकात्मभिनिवसन् ३-६१-४७
In Public domain. Digitization Muthulakshmi Research Academy

व

वदतु वदतु वाणी ४-६२-६४
वन्दामहे महेशान १-३५-७
वन्दे नीलसरोजकोमलरुचिं २-६७-२९
वन्दे पाण्डुरपुण्डरीकनयनं २-६६-२९
वन्देपितामह २-१९-२१
वन्दे राममनादिपूरुषमज २-६२-२८
वन्दे शौनकगौतमाद्यभिनुतं २-६३-२८
वन्दे सागरगर्वभञ्जकशर २-६८-२८
वन्दे सात्त्विकतत्त्वमुद्रिततनुं २-६९-२९
वन्दे साधकवर्गकल्पकतरुं २-६८-२९
वन्दे सूर्य शशाङ्कलोचनयुगं २-६४-२८
वरं न याचे रघुनाथ ४-४६-६२
वराभयं दिव्यरथाङ्गशङ्खं २-६-१९
वल्लीप्रवालनव १-७६-१४
वसन्ताक्षराख्ये २-८१-३१
वामाङ्कोपरि संस्थितावनिसुता १-८३-१५
वामाङ्कस्थितजानकीं परिलसत्कोदण्ड १-२७-६
वामाङ्कस्थितजानकीकुचयुगे ३-६९-४७
वामाङ्कोपरि तप्तकाञ्चननिभां ३-४१-४३
वामे कोदण्डदण्डं १-४२-९
वामे भूमिसुता पुरस्तु १-२८-६
वाल्मीकिस्मृतिमन्दरेण १-७२-१३
विद्युत्कोटिदिवाकरद्युतिनिभं ३-२७-४१
विद्युत्कोटिसहस्रभानुसदृशं ३-२८-४१
विद्युद्वर्णोपमाङ्गी ३-९९-५२
विद्युन्निभाम्भोद सुविग्रहाय ४-५५-६३
विद्युत्स्फुरन्मकरकुण्डलदीप्तचारु ३-७६-४९

In Public domain. Digitization Muthulakshmi Research Academy

विनील जलदोपम ४-१-४७
विबुधविटपिमूले जानकी ४-१२-५७
विभीषणकृते प्रीत्या म-१३-२
विमलकमलनेत्र १-५२-१०
विराजमानोज्ज्वलपीतवाससं २-१७-२१
विलोल मणिकुण्डलं २-७१-२९
विशालनेत्रं परिपूर्णगात्रं ४-२३-५९
विशालनेत्रं परिपूर्णगात्रं सीताकलत्रं ३-११२-५४
विशुद्धाख्यपद्मे नभस्तत्त्वरम्ये २-८५-३२
विश्वामित्रान्तरङ्गाय म-४-१
विश्वोद्भवस्थितिलयादिषु ३-७९-४९
विहाय कोदण्ड १-९९-१६
वृक्षे वृक्षे वीक्षिताः १-६७-१२
वदेवेदान्तवेद्याय म-३-१
वेदवेद्ये परे पुंसि १-१०२-१८
वेदान्तगानं स्वकृतैकदानं ४-३४-६०
वेद्यं वेद गुरुं २-३३-२३
वैकुण्ठे नगरे सुरद्रुमतले २-९९-२४
वैकुण्ठे पुटभेदने मणिमयप्रान्ते २-१००-३४
वैदेहस्य पुरे विवाहसमये १-३२-७
वैदेहीकुचमण्डलाग्रविलसन्माणिक्य ३-३३-४२
वैदेहीकुचमण्डलोपरिलसत् ३-३४-४२
वैदेहीपुलकाङ्कुरार्चिततनुः ३-६८-४७
वैदेहीप्रियवल्लभं विजयिनं ३-३४-४२
वैदेहीयुतवामभागमतुलं ३-३५-४२
वैदेहीरमणं विभीषणविभुं १-३१-७
वैदेहीरमणं हिरण्यतिलकं ३-४४-४४
वैदेहीरमणीयवक्त्रवनज ३-४७-४४
वैदेहीवशवर्तिनं रणजितं ३-४५-४४
वैदेहीसहितं च लक्ष्मणयुतं ३-७०-४८

वैदेहीसहितं सुरद्रुमतले १-२८-६

In Public domain. Digitization Muthulakshmi Research Academy
वैदेहीस्तनकुम्भसम्भ्रमपरीरम्भादृतं ३-४०-४३
वैदेह्या सममेत्य राज्यमनिशं ३-४६-४४
वैदेहीं परिरभ्य जातपुलकां १-३०-७
वैदेहीं मुदितोऽभिजातपुलकां १-२६-६

शतमखनुतरत्नं २-१०८-३५
शताष्टदिव्यस्थल २-११-२०
शत्रुच्छेदैकमन्त्रं १-८०-१४
शत्रुघ्नो व्यजनाञ्चितो ३-२५-४१
शान्तं शारदचन्द्रकोटि सदृशं ४-५२-६३
शीर्षाम्भोरुहकर्णिके २-५९-२७
शुद्धान्ते मातृमध्ये १-९२-१६
शृङ्गारं क्षितिनन्दिनीविहरणे १-३९-८
श्रीमते रघुवीराय म-११-१
श्रीमद्वैकुण्ठनाथं २-४६-२५
श्री रङ्गेशपदाब्जलग्नहृदयं २-२-१९
श्री राघवं दशरथात्मजमप्रमेयं १-२-२
श्री राघवेति रमणेति ४-४४-६२
श्री राघवेति वरदेति ३-११७-५४
श्रीरामचन्द्रकरुणाकर ४-३६-६१
श्रीरामचन्द्रकरुणाकर राघवेन्द्र १-७-३
श्रीरामचन्द्र तव १-२५-६
श्रीरामचन्द्ररघुपुङ्गव राजवर्य १-११-३
श्रीरामचन्द्रेति सलक्ष्मणेति १-९-३
श्रीरामचन्द्रे रमतां १-१०-३
श्रीरामचन्द्रे श्रितयोगिचन्द्रे ४-७९-६६
श्रीरामचन्द्रं धृतचापसायकं ४-३५-६१
श्रीरामचन्द्रः श्रितपारिजातः ३-११३-५४
श्रीरामनामामृतमन्त्रवीजं ४-७४-६५

श्रीरामभद्राश्रितयोगिवर्य ४-९४-६८
In Public domain. Digitization Muthulakshmi Research Academy
श्रीरामभद्राश्रितसद्गुरूणां ४-८५-६७
श्रीराम मे त्वं हि पिता च माता ३-१०८-५३
श्रीरामं करुणाकरं १-८-३
श्रीरामं जगदीश्वरं १-५-३
श्रीरामं जगदेकवीर १-४-२
श्रीरामं जककात्मजाकुचतटी ४-१-५६
श्रीरामं जनकक्षितीश्वर २-१-१९
श्रीरामं त्रिजगद्गुरुं १-१-२
श्रीरामं नवरत्न कुण्डलधरं ३-४८-४४
श्रीरामं बलवैरि १-३-२
श्रीरामं भुव्रनैकसुन्दरतनुं ३-४२-४३
श्रीरामं शिवचापभङ्गनिपुणं ३-१-३७
श्रीरामं सरसीरुहाक्षममलं १-१२-४
श्रीरामाऽमलपुण्डरीकनयन १-१४-४
श्रीरामः कल्पवृक्षो मे ४-६०-६४
श्रीरामः कुशिकात्मजस्य ४-३१-६०
श्रीरामश्शितिकन्धरस्य ३-२-३७
श्रीवत्साङ्कमुदारकौस्तुभलसत् ३-२१-४०
श्वेतपुष्पकमारुह्य १-६८-१२

स

संसारसागरभयापहविश्वमन्त्रं ३-११३-३६
सकलगुणनिधानः योगिभिः ३-११-३८
सकलभुवनरत्नं सच्चिदानन्दरत्नं २-१०५-३५
सकलभुवनरत्नं सर्व.... १-१७-१७
सकलसुकृतरत्नं २-१०९-३५
सकृत्प्रणतरक्षायां ३-९६-५९
सजलजलदनीलं ४-८२-६७
सत्यज्ञानमनन्त २-४१-२४
सत्येन लोकान् जयति ३-९३-५९

In Public domain. Digitization Muthulakshmi Research Academy

सदानन्ददेवे सहस्रारपद्मे २-७७-३२
सदा भोगभाजां ४-१०३-७०
सनन्दनमुनिप्रियं सकलवर्णवेदात्मकं २-७३-३०
सन्नद्धः कवची खड्गी ४-४२-६१
सम्पूर्णचन्द्रवदनं १-९३-१६
संसक्तदिव्यायुधकार्मुकाय ४-५६-६३
सरयूतीरवने लतानिवसने ४-२१-५९
सहस्रनेत्राननपादबाहु २-२५-२२
सहस्रपत्राम्बुजकर्णिकान्तः २-१०४-३४
साकेतेऽगरुगन्धधूपनिबिडे २-१७-३४
साकेतान्तररत्न २-१६-२१
साकेतेऽनलचन्द्रभानु २-१०२-३४
साकेते कनकाद्रि ४-४-५६
साकेते जननीकरार्पितलसत् ३-३८-४३
साकेते धवले सुरद्रुमतले २-५१-२६
साकेते नगरे समस्तमहिमाधारे २-७७-३०
साकेते नगरे समस्तसुखदे २-६१-२८
साकेते नवरत्न २-४-१९
साकेते प्रणवाक्य ४-२९-६०
साकेते मणिकोटिभिः ३-३७-४३
साकेते मणितोरणाञ्चित ४-३-५३
साकेते मणिनिर्मिते प्रविलसत् ३-३६-४२
साकेते मणिमण्डपे सुरतनुप्रान्ते २-४७-२५
साकेते मणिमण्टपे सुरतरुप्रान्ते.. २-७१-३१
साकेते रविकोटिसन्निभमहाहर्म्ये २-६०-२८
साकेते शरदिन्दुकुन्दधवले ३-१०३-५२
साकेते सरयूजलेऽतिविमले ३-३९-४३
साकेते सौधबद्धध्वज ४-२-५६
साकेते स्वनिकेतने सुरतरोर्मूले ३-९८-५२

साक्षात् षोडशदिव्यपत्रकमले २-५७-२७
In Public domain. Digitization Muthulakshmi Research Academy
सादरं शबरीदत्त म-९-१
सिंहासनस्थं मुनिसिद्धसेव्यं ४-९१-६८
सिंहासनस्थं सुरसेवितव्यं ३-५८-४६
सीतामनोमानस १-६२-११
सीतालोकनतत्परं २-२९-२२
सीताया दक्षिणे १-५६-११
सुग्रीवमित्रं परमं पवित्रं ४-४३-६१
सुग्रीवमित्रं सुजनानुरूपं लङ्काहरं ३-५९-४६
सुधासमुद्रान्तविराजमाने २-२१-२१
सुधाभासितद्वीपमध्ये २-८८-३२
सुधासमुद्रान्तविराजमाने २-२१-२१
सुपर्वादि ऋक्षोज्ज्वलस्वर्णपीठे २-९०-३२
स्फुरद्रत्नकेयूरहाराभिरामं ४-१००-६९
सुरानीकदुःखौघनाशैकहेतुं ४-९८-६९
सुराधीशनीलाभ्र ४-१०१-६९
सुस्निग्धं नीलकेशं १-३४-७
सेव्यं श्रीराममन्त्रं श्रवणशुभकरं ३-५३-४५
सौमित्रिणा च म-७-१
स्मिताननं पद्मदलायतेक्षणं २-२२-२१
स्वयुवतिकुचचन्द्रं बन्धुदुग्धाब्धिचन्द्रं ३-१४-३९
स्वाधिष्ठानसरोरुहे २-५४-२६

ह

हनुमत्समवेताय म-१०-१
हत्वा युद्धे दशास्यं ३-८४-५०
हा कृष्णाच्युत हा कृपालय हरे ४-७५-६६
हृत्पद्मे विलयार्ककोटिसदृशं २-५६-२७
हृदय सदयचिन्तं ४-६१-६४
हृदयकुहरमध्ये १-४८-२६
हे गोपालक हे दयाजलनिधे ४-२८-६०

हे रामभद्राश्रय हे कृपालो ४-७८-६६

In Public domain. Digitization Muthulakshmi Research Academy

हे राम हे रमण ४-१४-५८

हेलाभग्न शशाङ्कशेखधनुः ३-७५-४८

क्ष

क्षीराब्धौ शशिशङ्खमौक्तिलसद्द्वीपे २-१०१-३४

क्षीराम्भोनिधि १-४९-१०

वृत्तसूची

मङ्गलश्लोकाः

अनुष्टुप् - १,२,३,४,५,६,७,८,९,१०,११,१२,१३, (१-२)

प्रथमाश्वासः

शार्दूलविक्रीडितम् - I - १,३, ४, ५, ६,८ ,१२, १३, १४, १५, १६,१८,२१, २४, २६, २७, २८, २९, ३०,३१, ३२, ३७, ३८, ३९, ४५, ४७, ७२, ७४, ७५, ८२, ८३, ८४, ८६, ९०, १०५, II - १, २, ४, ५, १४, १५, १६, २८, ३०, ३१, ३२, ३३, ३४, ३५, ३६, ३७, ३८, ३९, ४०, ४१, ४२, ४७, ५०, ५१, ५३, ५४, ५५, ५६, ५७, ५८, ५९, ६०, ६१, ६२, ६३, ६४, ६५, ६६, ६७, ६८, ६९, ७५, ७६, ७७, ७८, ७९, ८०, ९७, ९८, ९९, १००, १०१, १०२, १०३, III - १, २, ४, ५, ६, ७, ८, १५, १६, १८, २०, २१, २२, २३, २४, २५, २६, २७, २८, २९, ३०, ३१, ३२, ३३, ३४, ३५, ३६, ३७, ३८, ३९, ४०, ४१, ४२, ४३, ४४, ४५, ४६, ४७, ४८, ४९, ६५, ६६, ६८, ६९, ७०, ७१, ७२, ७३, ७४. ७८, ८१, ९७, ९८, १०३, ११०, IV - १, ३, ४, ७, १७, १९, २८, २९, ३०, ३१, ४८, ४९, ५०, ५१, ५२, ५३, ७०, ८९, ९५, ९६, १०५, १०६,

वसन्ततिलकम् -I - २, ७, ११, २५, ३६, ४६, ५७, ७६, ७९, ९३, II - ३, १८, १९, २०, २७, ४९, ११३, ११५, III - ५०, ५२, ५४, ५५, ५६, ५७, ६४, ७४, ७६, ७९, ११७, १२१, १२२, IV - १३, १४, ३३, ३६, ४४, ६४, ६५, ६६, ६७, ६८, ६९, ८०,

इन्द्रवज्रा - I - ९, ६२, ९९, II - १० उत्तरार्धम् , १३, २९, १०६,III - ५८, ५९, ६१, ६३, ६७, ८८, १००, १०४, १०८, IV - ३२, ३९, ४३,

७४, ७७, ८८, ९१,
In Public domain. Digitization Muthulakshmi Research Academy

उपेन्द्रवज्रा -IV - ४६, ५८,

इन्द्रवंशा - I - ५९, IV - ३५, ९०,

उपजाति - I - १०, ४३, ४४, ७१, ७७, ८१, ९१, ९६, II - ६, ८, ९, ९अ, १२, २१, २३, २५, ९६, १०४, III - ६०, ६२, १०२, १०६, ११२, ११३, IV - २३, २४, ३४, ४७, ५४, ५५, ५६, ५७, ७८, ७९, ९३,

स्रग्धरा - I - १७, १९, २०, २२, ३४, ४१, ४२, ६९, ७८, ८०, ८५, ८७, ८८, ८९, ९२, ९८, II - ४६, III - ३, ९, ५३, ८३, ८४, ८५, ८६, ८७, ९०, ९९, १२३, IV - २, ८, १०, ११, १२, ४१, ८४,

रथोद्धता - I - २३, III - ८०, ९२, IV - २६,

मालिनी - I - ३३, ५२, ४५, ६०, ७०, ९७, १००, १०१, II - ४८, १०५, १०७, १०८, १०९, ११०, १११, ११२, ११४, III - १०, ११, १२, १३, १४, १९, ५१, ७७, १०१, १०९, १११, IV - १८, २०, २७, ३८, ६१, ६२, ८१, ८२, ८३, ८६, १०७,

अनुष्टुप् - I - ३५, ५३, ५४, ५६, ६८, ९५, १०२, १०३, १०४, III - ८२, ९३, ९४, ९५, ९६, १०५, १०७, ११४, ११५, ११९, १२०, IV - १५, १६, ४२, ४५(अ), ५९, ६०, ६३, ७१, ७६, ८७, ८८,

शालिनी -I ४०, ६६, ६७,

शिखरिणी -I - ६१, ६३, ६४, ६५, II - ४५,

मालाभारिणी -I - ७३, IV - ७२,

स्वागतवृत्तम् -I ९४, IV - ७३,

वंशस्थम् - II - ७, १०पूर्वार्धम्, ११, १७, २२, २४, IV - ३७, ९०

मन्दाक्रान्ता - II - ४३, ४४,

पृथिवी - II - ७०, ७१, ७२, ७३, ७४, IV - ५, ६, ९,

भुजङ्गप्रयातम् - II - ८२, ८३, ८४, ८५, ८६, ८७, ८८, ८९, ९०, ९१, ९२, ९३, ९४, ९५, IV - ९७, ९८, ९९, १००, १०१, १०२, १०३, १०४,

आर्या - III - १७, ९१,

स्वागता - III - ११८, IV - २५, २६, ४०, ७३,

मत्तेभशार्दूलौ - IV - २१,

In Public domain. Digitization Muthulakshmi Research Academy

Our Publications

Sl.No	Tittle	Revised Rates
1.	Jnanchaturvimsi	20.00
2.	Rigarthasara Part - I	25.00
3.	Stories from the Kathsaritsagara	20.00
4.	Sitaramavihara Kavya	25.00
5.	Danavivekodyota	25.00
6.	Catalogue of Skt.Mss.inO.U.Library	150.00
7.	Stories from the Kathsaritsagara part – II	25.00
8.	Aryasaptasati	50.00
9.	Vikramorvasiyam	30.00
10.	Danavivekodyota Part – II	30.00
11.	Danavivekodyota Part – III	35.00
12.	Sahityaratṇakara Part – I	50.00
13.	Sahityaratnakara Part – II	50.00
14.	Kasika Part – III (Indices) Vol.I	70.00
15.	Journal of Skt Academy Vol.I	25.00
16.	Journal of Skt Academy Vol.II	25.00
17.	Koundinya Siksha	5.00
18.	Sahityaratnakara Part – III	50.00
19.	Padamanjari Part – I	120.00
20.	Journal of Skt Academy Vol.III	25.00
21.	Padamanjari Part – II	120.00
22.	Journal of Skt Academy Vol.IV	25.00
23.	Samskrita Kavijivitam Part – II	90.00
24.	Sangitachandra	75.00
25.	Kriya Svara Lakshanam	50.00
26.	Parasika Lokoktayah	20.00
27.	Journal of Skt Academy Vol.V	25.00
28.	Minor works of Neelakantha Deekshita	25.00
29.	Journal of Skt Academy Vol. VI	25.00
30.	Journal of Skt Academy Vol. VII	25.00
31.	Kasika Vivarana Panjika (Nyasa-I)	125.00
32.	Kasika Part – III (Indices) Vol.II	75.00
33.	Mahisashatakam	30.00

In Public domain. Digitization Muthulakshmi Research Academy

34.	Kasika Vivarana Panjika (Nyasa-II)	120.00
35.	Katha in Sanskrit Portics	40.00
36.	Journal of Skt Academy Vol.VIII	25.00
37.	Paribhashedushekhara	90.00
38.	Journal of Skt Academy Vol.IX	25.00
39.	Journal of Skt Academy Vol.X	25.00
40.	Kadambarikathasara	30.00
41.	Ayurvedabdhisara Vol.I	100.00
42.	Journal of Skt Academy Vol.XI	25.00
43.	Suryadandaka	20.00
44.	Kavyalakshanavada	20.00
45.	Journal of Skt Academy Vol.XII	25.00
46.	Abhinavavasavadatta	20.00
47.	Ayurvedabdhisara	125.00
48.	Journal of Skt Academy Vol.XIII	25.00
49.	Prakrita Sabda Pradipika	40.00
50.	Journal of Skt Academy Vol.XIV	25.00
51.	Harivayastutih	30.00
52.	Samskrita Kavijivitam Part – I	90.00
53.	Journal of Skt Academy Vol.XV	25.00
54.	Journal of Skt Academy Vol.XVI	25.00
55.	Journal of Skt Academy Vol.XVII	25.00
56.	Yogasutra sara	15.00
57.	Dhatu Karika	25.00
58.	First Book of Sanskrit (Telugu)	50.00
59.	Panditaraja Kavya Samgraha	150.00
60.	Contribution of Andhra to Samskrit Literature	112.00
61.	Selection from Prakrit Literature (Telugu)	20.00
62.	Gita Govinda Mahakavyam	200.00
63.	HariHara Tattva Bhumika	25.00
64.	Amrutavarshini	50.00
65.	Intermediate (Telugu)	50.00
66.	Intermediate (English)	50.00
67.	Manishapanchakam (In print)	

Sanskrit Academy O.U. Campus, Hyderabad-7